Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

In his Dīpa-prakāśa[1] as well as his own commentary on it, viz., Śabda-prakāśa,[2] he himself gives the date of their composition as the Śaka year 1648 i.e. 1726-27 A.D. In another work of his, viz. the Śabdārtha-cintāmaṇi, the date of composition is given as 1737 A.D.[3] So there can be no doubt that Premanidhi flourished during the first half of the eighteenth century, and therefore, his wife, too.

Bhandarkar Oriental Research Institute :—प्रयोग-रत्नाकर, MS. no. 1133 of 1886—92.

1. Royal Asiatic Society of Bengal, 57. E. 5, fol. 42 (a-b)—इत्थं दीप-प्रकाशः कुमति-निरसनो···नग-जलधि-रस-क्ष्मा-प्रमाणे तु शाके मार्गे कृष्णे च पक्षे निशिभव-तिथौ नन्दभू-दीननाथ-प्रेम्णा केनापि [एतेन एकोनविंशति-दिनैः कृतोऽयं ग्रन्थ इत्युक्तम् comm.] बह्वचरमय-तनुतामादधानः प्रपूर्णः । Then after two verses is given the concluding verse of the work—यस्योद्द्योतमती, etc. (*vide supra*) and after the colophon इति श्रीप्रेमनिधि-शर्म-निर्मितो दीप-प्रकाशः सम्पूर्ण[ता]मगमत् ॥

The date of the MS. is given as 1785 saṃvat i.e. 1729 A.D. So the word जलधि above cannot mean 7 as in that case the date of the MS. would be earlier than the date of the composition of the work.

2. RASB., MS. 57. E. 5—

इत्थं शब्द-प्रकाशश्चरण-करुणया राजराजेश्वरस्य स्वीयाभीष्ट-दातुर्नग-जलधि-रस-क्ष्मा-शाके माघ-मासे । कृष्णाष्टम्यां प्रपूर्णः परपर-रुचिरार्थस्य लाभावबोधी मूलं, etc. Then after three verses are given the concluding verse—यस्योद्योतमतो सती, etc., and the colophon इति श्रीमत्-प्रेमनिधि-शर्म-निर्मित-दीप-प्रकाश-टिप्पण-भूत-शब्द-प्रकाश-ग्रन्थः सम्पूर्णः ।

3. MS. no. 4956 of the Raghunath Temple Library of His Highness the Maharaja of Jammu and Kashmir, fol. 362.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

CRITICAL ACCOUNT OF THE MSS. OF THE TEXT TANTRARĀJA.

As we are here directly concerned with only the first paṭala of the Tantrarāja Tantra out of the total thirty six, the critical account given here is short and principally of the MSS. of this paṭala only and not of those of the entire Tantrarāja.

Of the six MSS. used for this edition of the first paṭala of the Tantrarāja, A is very corrupt and B is, on the whole, good. Of C and D, C has better readings, though it is not at times clearly legible. Both have, on the whole, good appearance. E up to verse 50 is found in a rather damaged condition. F is fairly good, though at times its readings cannot be deciphered. A and B are written in Telugu script and the rest in Devanāgarī.

CRITICAL ESTIMATE OF THE MS. OF THE COMMENTARY SUDARŚANA.

The Sudarśana of Prāṇamañjarī has been catalogued in the Descriptive Catalogue of Sanskrit MSS. in the Sanskrit College, Calcutta, (vol. V, Tantras) under the heading सुदर्शं-नेत्र-पटल। The source of the mistake is the last line of the concluding verse of the commentary, अन्वर्थाख्यान-सुदर्शनेऽत्र पटलः पूर्वोऽप्यपूर्वो गतः (p. 74). Evidently सुदर्शनेऽत्र पटलः has been misread as सुदर्श-नेत्र-पटलः, while the correct reading is सुदर्शने अत्र पटलः, etc. It is perfectly clear from one of the introductory verses (no. 5) and other references, (e.g., p. 53, l. 15) that the name of the commentary is सुदर्शन, and not सुदर्श-नेत्र-पटलः।

The writing of the MS. of the Commentary Sudarśana is, on the whole, legible, though at times the readings

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

cannot be deciphered. It has an old appearance. Throughout the MS. the visarjanīyas have been dropped and anusvāras and e-kāras indiscriminately used. The ta-s have the annoying look of tta-s, sa-s that of pta-s and ākāras of ref-s. It is full of mistakes of various sorts, such as, omission or careless insertion of letters, putting in words or sentences in wrong places, etc. (See appendix, pp. 107ff). Besides these, there are some other mistakes noticed in the body of the work, with my own suggestions. Both the queried parts and the suggested readings have been given within square brackets [ ]. In some cases, however, no suggestions for improvement could be made ; so, these have been left simply queried. The MS. consists of forty-five folios of which three are missing[1] ; according to the scribe, there were four more folios at the end.

It has been stated in the preface that some readings (viz. twelve) of the Text as given in the commentary have not been incorporated by me in the Text of the Tantrarāja but have only been noted in foot-notes, as they are not found in any one of the six MSS. of the Text consulted by me. The following are those twelve cases :—

I. ततो ह्रयोः, v. 9d. While this reading is not found in any one of the MSS. consulted, the reading तयोर्ह्रयोः is found in all of them except one (A)[2]. So in accordance with our principle, the latter reading has been accepted though it does not seem to make a clear sense. ततो ह्रयोः, on the other hand, makes a good sense.

1. See f. n. 1, p. 24 ; f.n. 2, p. 55.

2. For this and other variant readings, see pp. 77-81.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

II. तच्छिष्ये प्रतिपादनात्, v. 21d. The commentator herself accepts both this and तच्छक्ति-प्रतिपादनात्[1] as alternative readings and states that both mean exactly the same thing. As really both of them are equally good and again, as all the six MSS. unanimously give us the reading तच्छक्ति-प्रतिपादनात्, this latter reading has been accepted.

III. यत्तत्-स्पृष्टं, v. 34d. This reading is not found in any of the MSS. used. Of the six MSS. two (B and D) give the reading यत्तस्पृष्टं ; two (A and C) स्पृष्टं while the remaining two (E and F) पृष्ट । Of these three readings, दृष्टं gives the best sense. So it has been accepted. The reading of the commentary also is a good one.

IV. चत्वारि योजयेदाद्यान्, v. 41c. It has not been accepted for two reasons : (1) चत्वारि, as an adjective to आद्यान्, is grammatically wrong as Prāṇamañjarī herself admits (p. 31) ; (2) none of our MSS. gives exactly the same reading. We find three different readings in the MSS. :—चतुरो योजयेदाद्यान् (B) ; चत्वारि योजयेद्विद्वान् (A-C-D-F) and चत्वारि योजयेदाद्य (E). The reading चतुरो योजयेदाद्यान् has been accepted, because this reading is grammatically correct and also suits our context best. But the reading चत्वारि योजयेद्विद्वान् leaves out the sense of आद्यान् altogether and the mention of विद्वान् in the verse is quite unnecessary. The third reading चत्वारि योजयेदाद्य is grammatically incorrect. As the word चत्वारि appears in five MSS., it could have been accepted but it was not, as in none of the MSS. recording चत्वारि the word following योजयेत् is a satisfactory one.

V. सिद्धये, v. 53b. It is not found in any of the six MSS. while साधने occurs in all of them. So साधने has

---

1. P. 19, l. 5.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

been accepted. The reading सिद्धये (निमित्तार्थे चतुर्थी) is, however, better from the grammatical point of view, because निमित्तार्थे सप्तमी in साधने does not involve any idea of संयोग or समवाय योग which it ought to have done in accordance with the vārtika योगः संयोग-समवायात्मकः on the aphorism of Pāṇini निमित्तात् कर्म-योगे (2. 3. 36; SidKau. 633, p. 157).

VI. स्वकुल्यान्[1], v. 54b. It is not found in any of the MSS.; so it has not been incorporated in the Text. The reading स्वकुलं, though given in one MS. only (viz. A), has been accepted, as the other reading स्व-कुलान् given in other MSS., is grammatically wrong, the word कुलं being always neuter. The reading of the commentator is equally good.

VII. मन्त्रं, v. 60d. This reading is not given in any of the MSS. Two different readings are found in them, मन्त्रे (A-B-C-D) and मन्त्र (E-F). None of these two is happy, because in both the cases we have to supply the word मन्त्रं as an object of the verb अनादृत्य। Further the use of the seventh case-ending in मन्त्रे is not happy. None of these two being adequately expressive, the reading that is found in the larger no. of MSS. (i.e. मन्त्रे) has been accepted. The reading मन्त्रं given by the commentator is, however, better, as it makes the meaning clear without necessitating the supplial of any other word as an object of अनादृत्य।

VIII. एवं धनर्णां-भुञ्जिस्तु, v. 61c. Here the commentator does not exactly give the reading एवं धनर्णां-भुञ्जिस्तु ; she gives this on a previous occasion where she quotes the

1. The passage concerned in the commentary (p. 46) does not contain the exact word सकुल्यान्, but runs as follows "न तु सकुलेषु कचिदपि परित्यजेत्"।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Equipment Heritage Foundation, Jalgaon

second line of the verse (p. 40)[1]; and, therefore, there is no doubt that this is the reading she accepts. But it is not found in any of the six MSS. while the reading given by me is supported by all of them. Further the reading तस्मात् of the MSS. makes a better sense, because an हेतु-हेतुमद्भाव (relation of ground and consequence) between the first and second lines of the verse seems to suit the context better. धनर्णा-शुद्धि and ऋणा-विशुद्धि mean the same thing.

IX. सर्वशः, v. 61d. It was not accepted for four reasons. Firstly, the commentator herself gives the reading सर्वतः on a previous occasion where she quotes this verse (p. 40). Secondly, here too, from the meaning she gives, it seems that she really meant सर्वतः and not सर्वशः; probably, the scribe is to be blamed for this mistake. Thirdly, her reading finds no support in any of the MSS. while all of them read सर्वतः given by me. Finally सर्वतः gives a better sense.

X. मूलं, v. 67b. Though the folios of the MS. dealing with this part of the commentary are missing, still there is no doubt that the commentator accepts the reading मूलं instead of विद्यां, for her quotation of the line elsewhere (p. 11, l. 17) contains the word मूलं. Both the readings मूलं and विद्यां are equally good; but the former is not found in any of the MSS. consulted, while the latter occurs in all of them. So the latter has been accepted.

XI. जपादङ्ग, v. 79a. It has not been accepted because (1) it is not found in any of the MSS. consulted whereas all the MSS. are unanimous with regard to the reading जापात्; (2) the meaning of both is, however, the

1. "एवं धनर्णा-शुद्धिस्तु कार्या सर्वैस्तु सर्वतः"।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

same; and (3) the short syllable in जपात् violates the metrical principle "द्वि-चतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः"[1] though this is not always strictly observed.

XII. नमस्कुर्याम्, v. 100b. The reading नमस्कुर्यात् has been accepted as it is supported by all of our MSS., while नमस्कुर्यां of the commentary is not found in any one of them. नमस्कुर्यां is, however, better, because according to v. 95, the following five verses (i.e., 96-100) constitute a stava and in a stava the first person is generally used; particularly here the use of the word मे in v. 100 c is consistent with this reading.

Following my principle which has worked out well in the rest of the work, I did not incorporate these twelve readings of the commentary. It is, however, clear from the above discussion that these readings are at times better than those of the six MSS. consulted. The fact that they have been placed in foot-notes does not mean that they are of inferior merit; it simply means that they are not found in the MSS. of the Text consulted and following strictly as I have done the principle mentioned in the preface, I have been compelled to leave them out of the Text.

---

1. S'ruta-bodha, v. 10.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

TEXT

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

तन्त्रराज-तन्त्रम्

प्राणमञ्जरी-कृत-तन्त्रराज-सुदर्शनाख्य-टीका-सहितम् ।

[टीकाकृतो मङ्गलाचरणम्]

श्रीराजराजेश्वराय नमः ।

अनीशोऽपि श्रीशो विधुरगति-पुंसां गतिकरोऽ-

पवर्गाद्यं यस्मात् फलमलमसूतेऽपि (?) विमलम् ।

असङ्गे तुर्नाना-विमतिरपि सत्यार्थ-मतिदः

सहायः कोऽप्येषोऽत्र तु भवतु मे हैहय-पतिः ॥ १ ॥

श्रीकार्तवीर्य-पदराडिह योग-रूढ्या

स्वीयेष्ट-देवमिव केवल-योग-युक्त्या ।

तच्छक्तिमप्यभिवदत्यत उद्यमोऽयं

श्रीसुन्दरी-भजन-कल्प-विवेचने मे ॥ २ ॥

श्रीराज-राजेश्वर-कल्पमुक्ता

दीप-प्रकाश-प्रमुख-प्रबन्धैः ।

श्रीतन्त्र-राजार्थ-सुदर्शनेन

तच्छक्ति-कल्पं विवृणोमि किञ्चित् ॥ ३ ॥

न तन्त्रार्थं जाने क्व च भवति तद्राज-विषमा-

र्थ-बोधाशा दूरे बत गतवती टिप्पण-कथा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

तथापिप्रथा सिद्धिं व्रजति यदि तर्हि ध्रुवमहो
सुगुर्विष्ट-प्रेमामर-तरुरिहाऽऽस्ते स-करुणः ॥ ४ ॥

याते मुक्ति-पदं सुदर्शन-सुतेऽसृङ्‌ मांस-मेदोमये
पूर्णं-श्रीश-सुदर्शनावतरणांघ्रि-प्रेम-माहात्म्यतः ।
विद्वन्मानस-राज-हंसमपरं श्रीमत्-पति-प्रेमतः
श्रीतत्त्वार्थ-सुदर्शनं नवमहं कुर्वेऽध्वरालीमयम् ॥ ५ ॥

यस्याः कोऽपि च हर्ष-देव-विबुधस्तातः प्रसूः श्रीमती
ख्याता हर्षमतीति गितः (?) कूर्माचलो जन्म-भूः ।
विद्वत्-प्रेमनिधेस्ततोय-वनिता श्रीप्राणमञ्जर्यहं
कुर्वे गोपित-तन्त्रराज-विषमार्थ-व्रातमाशु स्फुटम् ॥ ६ ॥

———

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

तन्त्रराज-तन्त्रम् ।

प्रथमः पटलः ।

अनाद्यन्तोऽपराधीनः स्वाधीन-भुवन-त्रयः ।
जयत्यविरतो व्याप्त-विश्वः कालो विनायकः ॥१॥

तन्त्रराज-सुदर्शनम्

अथ श्रीपति-गणपति-दिवाकर-देवी-महेश्वरात्मक-पञ्चायतन-देवतानां तदवान्तर-भेदानां चानन्तत्वेनोपास्य-देवताऽनैयत्येऽपि स्वस्व-पूर्व-पूर्व-कर्म-वैभव-भव-रुचि-वैचित्र्येण श्रीमत्त्रिपुर-सुन्दरी-चरण-परिचर्या-तरीत एवापार-संसार-सिन्धुमुत्तितीर्षूणां साधकानामपर-नाना-तन्त्र-गवेषण-तदेक-वाक्यता-करणादि-क्लेश-परिहारेणाभीष्टार्थ-सार्थ-सिद्धि-चिकीर्षया परम-कारुणिको भगवान् श्रीसदाशिवः पर-तन्त्रानपेक्ष-तन्त्रराज-निर्माण-कामो भगवतो निर्विघ्न-ग्रन्थ-समाप्तेः स्वेच्छा-मात्रत एव सम्भवेऽपि विघ्न-नाशनाधिकारस्य गणेश-रूप-मूर्ति-विशेष एवास्तीति ध्वनयितुं विनायकत्वेन स्वात्मन एव नमस्कारात्मकं मङ्गलं निर्माय पिपठिषूणां निष्प्रत्यूह-ग्रन्थ-परिपूर्त्यै भगवतापि गणपति-प्रणति-रूपं मङ्गलमनुष्ठितं का कथाऽस्माकमिति लोकान् शिक्षयितुं च तदादौ निबध्नाति—अनाद्यन्त इत्यादिना। अथवाऽनेन श्लोकेन पञ्चानामप्युक्त-श्रीपत्यादि-देवतानां जयत्यर्थ-[कर्मत्वं ? कर्तृत्वं] विवक्षितम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

अथ सर्व-कर्मारम्भे श्रीविष्णु-स्मरणानुष्ठानस्य सकल-श्रुति-स्मृति-सिद्धस्य रक्षार्थे अध्येतॄणां तत्-सिद्धये च विष्णोः, ग्रन्थ-कर्तृत्वेन शिवस्य, ग्रन्थ-प्रतिपाद्यत्वेन शिवाया वक्ष्यमाण-दिशा अवश्य-स्मरणीयत्वेऽपि कुतो रवेरप्रस्तुतस्य स्मरणमिति चेत्, मैवं, ग्रन्थ-समाप्ति-विघटक-रोग-दारिद्र्यादि-ध्वंसासाधारण्यस्य तत्रापि सत्त्वात्, शक्यते च सोऽपीतो बोधयितुं, वेदरूणस्य नायकत्वात् अरुण-कर्तृक-रथ-नियामकत्वाच्च। कालत्वञ्च क्षण-घटिकादि-काल-निर्वाहक-गतिकत्वात्। अनादेरपि सान्तत्वम् अनन्तस्यापि सादित्वं प्रागभाव-ध्वंसयोर्दृष्टं न जातु जयत्यर्थ [कर्म ? कर्तृ] त्वमतस्त-दुभयोपादानम्, इष्टद्वयस्य मध्य-हीनत्वमार्थिकमिति तन्नीतम्। अनाद्यन्तस्याप्यत्यन्ताभावादेर्नोत्कर्षः इत्यतोऽपराधीन इति। अत्यन्ताभावो हि प्रतियोग्यनधिकरणताधीनाधिकरणताकस्तत्-प्रत्ययाधीन-प्रत्ययकश्च, असौ तु नैवम्। अस्तु वा परानधीनत्वं, स्वाधीन-त्रिलोकीकत्वं तु नास्य जडत्वात् संभावितम्। यद्वाऽनादेः संसारस्यान्तो नाशो यस्मात्, यद्विषयकोपासनया अनादि-प्रवाहकस्य संसारस्य नाश इति यावत्।

ननु अधीनं भुवन-त्रयं यस्येत्यवश्यमभ्युपेय-बहुव्रीहि-गौवोक्त-विवक्षितार्थ-लाभेन स्व-पदमनतिप्रयोजनकमिति चेत्, एवं तर्हि सु सम्यगाधियन्ते त्वेवंभूतं (स्वसाम्य-पर पयोपेनं ?) भूतं च भुवन-त्रयं येनेत्येवमस्तु विग्रहः। उक्तार्थस्तु अपराधीन इत्यत्रापरे अधीना यस्य' इति विग्रहस्यापि 'न पराधीन' इति विग्रहस्यैव विवक्षितत्वाच्छक्यते लब्धुमिति किमनुपपन्नम्। अविरतं सर्वदैव संसारोत्पादनादि-कर्मसु व्यासक्तो न पुन-स्तत्राङ्गीकृत-विरामः। अत एव संसारोऽनादि-प्रवाह इति

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

गीयते। अविरतस्यापि जल-प्रवाह-पवन-परमाण्वादि-कर्मणो जयत्यर्थानाश्रयतयोक्तं व्याप्तविश्व इति। कालस्त्रुटि-पल-घटिकादि-महाप्रलयान्तः। विगतो नेता यस्येत्यस्यार्थस्यापराधीन-पदेनैव प्राप्ततया विशिष्टो नायक इति योगार्थ-रूढिभ्यां गण-पतिरत्र तत् पदेन विवक्षितः।

प्रस्तुत-तन्त्र-निरूप्य-देवतायाः काल-रूपताया वक्ष्यमाणतया कालात्मकत्वेन वा स्व-स्तुतिरत्र विवक्षिता, तत्राप्युक्त-विशेषणानां निरपवादं प्रवृत्तेः। अविनायक इति अकार-प्रश्लेषेण अवेः सूर्यस्य नायको नयन-कर्ता प्रेरक इति यावत्, सूर्य्य एव वा क्षण-घटिकादि-काल-ज्ञापकतया नायको यस्य इत्यर्थः।

विष्णु-रूपात्मकत्वेन वा स्व-स्तुतिर्विवक्षिता। विः पक्षि-विशेषो गरुडो नायको नेता यस्य स तथा, वेर्नायक इति षष्ठी-तत्पुरुषो वा। कालो मेघ-श्यामः। अपरः स्वतोऽभिन्नः, भक्ति-विशेषादिना स्वतोऽपरत्वं स्व-तादात्म्यमिव प्राप्तो यः स्व-भक्तस्तदधीनः।

यो यो यां यां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्॥

इत्यादि-वचनैर्भक्ताधीनत्व-ज्ञापनात्। एतेन कर्मणामाद्यन्त-भागे भगवत्-स्मरणमावश्यकं

यस्य स्मृत्या च नामोक्त्या तपोयज्ञ-क्रियादिषु।
न्यूनं संपूर्णतां याति——॥

इत्यादि-स्मार्तार्थोऽनुगृहीतो भवति।

तत्तद्ग्रन्थाध्ययनारम्भे तत्तद्ग्रन्थ-कर्तृ-स्तुतिरप्युचितेति सूचयितुमेतदध्येतणां तत्-सिद्धये श्रीशिवात्मकस्य स्वस्यैव वा

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

स्वरूपेण स्तुतिरत्र विवक्षिता। काल-पदस्य रूढेः शिवे सत्त्वात्। विनायकत्वानाद्यन्तत्वादिकं सकल-स्तुत्य-साधारण्येन शक्यते योजयितुम्। यद्वा, न विद्यते पर उत्कृष्टो यस्याः सकाशात् सा अपरा सर्वोत्कृष्टा प्रस्तुत-देवी, तदधीनः। किं वा, उः शिवस्तत्-परेति प्रस्तुत-देवी-परम्, अनाद्यन्तेति तु शिवस्य देव्या वा, विशेषणं संभवति। विशेष्य-गतं त्वनाद्यन्तत्वं व्याप्त-विश्वत्वे नैवाधिगम्यम्। नहि विश्वान्तर्गत-भूत-भावि-पदार्थावस्थिति-कालासम्बन्धिन-स्तद्व्याप्यत्वं सम्भवदुक्तिकम्। ईदृश-कालस्यापि जयत्यर्थ-सम्बन्धे का कथा यदधीनोऽयं तस्याः समुत्कर्षे। एतावता यद्देवताया यत्र ग्रन्थादिश्चिकीर्षितस्तत्रादौ तत्-स्तुतिरेव समुचितेति ध्वनितम्। कालस्यैव प्रसिद्धस्य विशेष्यत्वेऽपि उ-परायाः शिवानु-रक्ताया अधीनत्व-कथनात् सृष्ट्यादि-कालस्तत्-कर्तृक इति तदुत्-कर्षे कैमुतिक-न्यायेन काल-गताधीनता-निरूपिकाया उत्कर्षे-ऽवगते सुतरां यन्निरतेयं तस्य तथात्वमधिगम्यते इति शिवः शक्तिः कालस्त्रितयमपि जयतीत्यर्थः पर्यवस्यति।

अपरे तु, अकारेण अम्ब्वनिलावनीनां प्रथम-प्रथम-नाम-वर्ण-संग्रहेणात्र क्रमेण सकार-ककार-लकारा विवक्षिताः। नकारेण नभसः प्रथमाक्षरेण हकारः, तदनन्तर-ह्रस्वाकारेणाग्नि-नामैक-देशेन रकार-चतुर्थस्वरौ तदनन्तर-दीर्घाकारेणाऽऽकाश-नामैक-देशेन बिन्दुर्विवक्षित इति। एते वर्णा आद्यन्तेषु प्रथम-द्वितीयादि-स्थानेषु यस्येत्येवंभूतो वर्ण-समुदायो जयति। एतावता तृतीय-खण्डस्यैव स्वारस्येनोद्धारेऽपि आवृत्त्यनुपूर्वी-भेदाभ्यामित एव वर्णा द्वितीय-प्रथम-खण्डयोरपीति तावप्युद्धृत-प्रायौ। अपरा भुवनेश्वरी-बीजं त्रिष्वपि बीजेषु घटकतया अधीनमिव

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

भगवन् ! सर्व-तन्त्राणि भवतोक्तानि मे पुरा ।
नित्यानां षोडशानां च नव तन्त्राणि सर्वशः ॥२॥

यस्येति तद्विशेषणम् । पञ्च-भूतानामिव प्रोक्त-वर्णात्मकानां सर्व-विश्व-सम्पादकत्वात् स्वाधीनेत्याद्यपि तथा । अ-वि-रतोऽग्नि-विधु-रविभिर्व्याप्तं विश्वं येनेत्यपि तथा । खण्ड-त्रयस्याग्न्यादेः (तेषां त्रय ?) रूपताया व्यक्तत्वात् । कालात्मकतायाः प्रस्तुत-देवताया वक्ष्यमाणत्वात् कालेति स्पष्टम् । अर्क-विधू स्वगत्या ज्ञापकौ नयन-कर्तारौ वा यस्यासाववविनायकः, कालद्वारा वर्ण-विशेषणम्, तथा च प्रस्तुत-देवतैवात्र श्लोके जयत्यर्थ-वत्त्वेन प्रतिपाद्यते । यद्वा पञ्चदश-संख्यावानिति (?) कालपक्षार्थस्तद्विशेषण-ककार-ह्रस्वाकार-दीर्घाकार-पञ्चक-सकारैः पञ्चदश-संख्याया अंश-आद्यचा तद्वत्तायाश्चाधिगन्तुं शक्यत्वादिति वदन्ति । अतोऽविः सूर्यो जयति यतोऽसावुक्तानाद्यन्तत्वादि-विशेषणाक्रान्त इत्यर्थः । इति पञ्चायतन-देवतानां नमस्कार-करणम् ॥१॥

मङ्गल-निर्माण-निबन्धयोरनन्तरं तन्त्र-निरूपणीयार्थ-सार्थं विवक्षुः

"नचाशुश्रूषवे वाच्यं नाभक्ताय न चाधिने"

इत्यादि-निषेध-शास्त्रस्य मयैवोल्लङ्घने

"मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः"

इत्युक्त्वा परेऽपि देशिका यतस्ततः प्रचारयिष्यन्तीत्यभिप्रेत्य नहि मयाऽप्यशुश्रूषवे कथितमिदं तन्त्रमिति बोधयितुं देव्याः शुश्रूषां दर्शयति—भगवन्नित्यादिना । अतथा-भूतस्यैक-तन्त्र-कथनेऽपि न पाटवं सम्भवति कैव कथाऽखिल-तन्त्र-कथने

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

तेषामन्योन्य-सापेक्ष्याज्जायते मति-विभ्रमः ।
तस्मात्तु निरपेक्षं मे तन्त्रं तासां वद प्रभो ! ॥३॥

इत्यभिप्रेत्य तादृश-कथन-योग्यता-सूचकं रूपं सम्बोधनेन दर्शितम् । सर्व-तन्त्राणि—सकल-देवता-प्रतिपादक-यामलोड्डामर-प्रभृति-तन्त्राणि । षोडश-नित्यानां स्वयमेव स्रष्टी-करणीय-संज्ञाना-मेवासाधारण-विषयाणि च सुन्दरी-हृदय(१)-नित्या-षोडशिका-र्णव-(२)चन्द्र-ज्ञान-(३)मातृका-तन्त्र-(४)सम्मोहन-तन्त्र-(५)वामके-श्वर-तन्त्र-(६)बहु-रूपाष्टक-(७)प्रस्तार-चिन्तामणि-(८)मेरु-प्रस्तारा-भिधानानि(९)नव तन्त्राणि च भवतीत्युक्तानि । मौलश्चकारः सर्व-तन्त्रैः सह नव-तन्त्राणां समुच्चायकः ॥२॥

तर्हि किमंशे जिज्ञासेत्यत्राह—तेषामित्यादि । तेषां सर्व-तन्त्राणां नव-तन्त्राणाञ्च । मति-विभ्रम इति । यथा हि पूर्वोक्त-तन्त्राणाम् अन्यतमस्य तदन्यतमापेक्षां कृत्वा प्राप्यार्थे न नैराकाङ्क्ष्यं भवति, तथा तदतिरिक्तस्याप्यपेक्षा किमस्ति नवेति व्यामोहो भवतीति, अनूक्तानामपि तन्त्राणां सर्वत्रापि समुच्चय एव आहोस्वित् क्वचिद् विकल्पोऽनुकल्पोऽपि वा भवतीति च शङ्का भवतीत्यर्थः ।

यत्तु नव-तन्त्राणामेव परस्पर-सापेक्ष्यान्मति-विभ्रमं वर्णयित्वा तन्निरपेक्ष-तन्त्रस्यैव जिज्ञास्यत्वमिति, तन्न, तथा सति नवातिरिक्त-तन्त्र-सापेक्षत्वेन पूर्णत्वानापत्तेः, मति-विभ्रम-सामान्याभावाना-पत्तेश्च, सर्व-तन्त्राण्युक्तानीति कथनस्य निष्प्रयोजनत्वापत्तेश्च । तस्मादुक्त-तन्त्राणां व्यामोहकत्वे हेतु-भूतं परस्पर-सापेक्षत्वं यत्र नास्ति तादृक् तन्त्रं मे परम-प्रेम-पात्र-भूताया निकटे वदेति

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

शृणु कादिमतं तन्त्रं पूर्णमन्यानपेक्षया ।
गोप्यं सर्व-प्रयत्नेन गोपनं तन्त्र-चोदितम् ॥४॥

प्रार्थना देव्याः श्रीशिवं प्रति। अपर-नैरपेक्ष्येण तन्त्र-प्रणयने मम सामर्थ्यं नास्तीति यदि ब्रूयात् तत्राह—प्रभो इति ॥३॥

उत्तरयति—शृणित्यादिना। अन्यथा अरण्यरुदितं स्यादिति भावः। तन्त्रं स्वतन्त्रसंज्ञं पूर्णं पूर्णसंज्ञं रूढ्या, अत एव तन्त्र-राजेति पूर्णतन्त्रेति स्वतन्त्रतन्त्रेति कादिमतेति चत्वारि नामान्यस्य तन्त्रस्येति प्रामाणिकाः।

न केवलं रूढ्यैव तथा-नामकत्वमस्य किन्तु योगेनापीत्याह—अन्यानपेक्षयेति। तथा च स्वतन्त्रत्वमपि अन्यानपेक्षया तन्त्रान्तरोत्कर्षादिकानपेक्षया। तन्त्रान्तरतो नवीन-रीत्या-श्रयणादिति यावत्। उभयान्वये उत्तरान्वये वा अन्त्र एवोपादानं तन्त्रपदस्य स्यादिति शङ्कया प्रसिद्ध-नाम-चतुष्टय-मध्ये नाम-त्रयस्यैव कथनं न तु नामान्तरस्यापि, नापि तदर्थ-विवेचनं कृतं कुतो नेति शङ्काया अभ्युदासः, चतुर्थ-नाम्नस्तदर्थस्य च कथन-परतया मूल-योजनात्। तथा पर-तन्त्रानपेक्षत्वमेव पूर्ण-तन्त्रत्वमत्र बोध्यम्। गोप्यं ध्येयं न प्रकाश्यं, सति सामर्थ्ये परोऽपि यथा गोपयति तथाऽनुष्ठेयं, न तूदासीनतया स्थेयम्। ननु तदर्थ-ज्ञातरि तत्-प्रकाशनेन न कोऽपि विध्यतिक्रमः स्यादित्यत्राह—तन्त्रेति। तथा च तन्त्र-शास्त्रे गोपनस्य विहितत्वात् तदतिक्रमे दोषः स्यादेवेत्यभिप्रायः। यत्तु—

"वृत्तजार्णान् लिखेदङ्कैर्व्यस्त-क्रम-योगतः"

इत्यादि-रीत्या प्रस्तुते तन्त्र एव चोदितं गोपनमनुष्ठेयमिति

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

मनोरमाकृतोक्तम्, तन्न युक्तं, संपूर्ण-तन्त्रस्यैव साम्प्रतं गोपना-भ्यनुज्ञानात्, तस्य च तादृश-प्रकारेण गोपनस्याशक्यत्वात् पूर्व-पूर्व-साधकैस्तथाऽननुष्ठितत्वात्। अत एव भगवतापि अतिरहस्य-भूत-मन्त्रोद्धार-प्रकारादेरेव तादृश-प्रकारेण गोपनं स्वीकृतम्।

न चेहापि मन्त्रादिक-मात्रं गोप्यत्वेन विवक्षितं न सम्पूर्णं तन्त्रमिति वाच्यम्, मन्त्रादेरप्रस्तुतत्वेन तन्मात्र-परत्वे ग्रन्थ-गौरव-प्रसङ्गात्। तस्मात् पुस्तकदान-तदर्थाकरणात् तत्-सङ्केता-प्रकाशनादिना सम्पूर्णं तन्त्रमेव गोपनीयमित्यभिप्रायः।

यत्तु संपूर्णमेव तन्त्रं व्याकुल-श्लोकैर्भगवता कृतं सर्व-भुवि तथैवावतीर्णमपि पण्डितैरेवं कृतमिति मतं, तदपि न, एवं तर्हि गोपन-विधानमिदं विफलं स्यात्। किञ्च "श्लोकेन" इत्यादि-श्लोकस्य व्याकुलाक्षरकत्वं न वा? अन्त्ये तन्त्रान्त-र्गतस्यास्य गोपनानापत्तेः। आद्ये तन्त्र-वाचन-प्रकार-प्रदर्शक-स्यापि श्लोकस्य वाचनानापत्तेः। गुरु-परम्परातस्तथेति चेत्, एवं तर्हि तत एव सर्व-श्लोकानां वाचन-सम्भवेन तद्वाचन-प्रकारोपदेश-वैयर्थ्य-प्रसङ्गात्। अस्मन्मते चाव्याकुलाक्षरक-श्लोकादेक-श्लोकस्योपदेशरूपस्य वाचनं तेन च सर्वापर-व्याकुला-क्षरक-श्लोक-वाचनमिति भवति तत्-साफल्यम्। न च तद्वाचन-प्रकारादेवापर-वाचनं भविष्यतीति वाच्यं, गुरु-परम्परायाः प्रामाण्य-रक्षार्थमेव तदुपादान-साफल्यादिति तत्त्वम्।

नन्वेवं तन्त्रमेव सकलमध्ययनाध्यापनादि-विरहान्नष्टं स्यात्? न स्यात्। तन्त्र-चोदितमित्यनेन,

"न चाशुश्रूषवे वाच्यं नाशिष्टाय न दम्भिने।"

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

इत्यादिना तन्त्रान्तरे,

"नाभक्ताय कदाचन नाग्निष्याय न दम्भाय"

इत्यादिना प्रस्तुत-तन्त्रे च प्रतिषिद्ध-व्यतिरिक्ताय दानस्याभ्यनुज्ञातत्वात्।

अत्रेदं शङ्क्यते—एतत्-तन्त्रस्य यत्-किञ्चिदंशे किमन्यानपेक्षत्वम् आहोस्विद् यावदंशे? तत्र नाद्यः पक्षः, इतर-तन्त्रेष्वपि यत्-किञ्चिदंशे नैरपेक्ष्यस्यानपायात्। नहि वामकेश्वर-तन्त्रादावपि सर्वोऽप्यर्थः पर-सापेक्ष एवोक्तः। नाप्यन्त्यः, प्रस्तुत-तन्त्रेऽप्यसम्भवात्, नहि प्रकृतोपयोगितया कोऽप्यर्थोऽत्र परतो नैवोपादेयः। अत एव "नाम्नश्चाद्याचरेण चे"ति वक्ष्यमाण-मूलेनानामकानां पुंसां किं नाम ग्राह्यमिति सन्देहे तन्निरासार्थं

"कृष्ण-सिद्धादि-योगेषु मन्त्रदाने विशेषतः।
प्रसिद्धं नाम गृह्णीयात् प्रसुप्तो येन जागृयात्॥"

इति तन्त्रान्तरमनुसृतं मनोरमा-कृता, निधि-कृतोऽप्येवमभिप्रेतम्। नापि अन्यस्मिंस्तन्त्रान्तरे एतत्-तन्त्रानपेक्षयाऽस्य पूर्णत्वमिति वक्तुमुचितं

"नित्यातिक्रम-दोषाणां शान्त्यै मूलं शतं जपेत्।"

इत्यादि-प्रस्तुत-तन्त्र-वचनानां तन्त्रसारादि-प्रामाणिक-ग्रन्थेषु देवतान्तरेष्वपि योजितत्वात्, पूर्णतायाः परकृतापेक्षायामप्यविधानाच्चेति। उच्यते—सकलदेवता-साधारण-यत्-किञ्चित्-सामान्य-शास्त्रापेक्षणेऽपि देवता-विशेष-कल्पोक्तानामेतत्-तन्त्र-देवता-विषयक-तन्त्रान्तराणां चानपेक्षणेनैव पूर्णत्वमस्य तन्त्रस्येति। अत एवान्येषां तन्त्राणां परस्परापेक्षा-कृतमेव दूषणं तन्त्रान्तरारम्भणे बीजमिति प्रश्नोत्तर-वाक्याभ्यामध्यवसीयते इति दिक्॥४॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

कथं कादिमतं नाम्ना तन्मे ब्रूहि महेश्वर !
कादि-कालीति शक्ती स्तः पुरा तत्तन्मते मया ॥५॥
प्रोक्ते तन्त्रे कादि-काली-मताख्ये तेन नामतः ।
शृणु तत्सर्व-तन्त्राणां राजानं सर्व-सिद्धिदम् ॥६॥

कादिमतमित्यादिना पूर्वं नामत्रयमुक्तं, तत्र स्वतन्त्र-पद-पूर्ण-पदयोरर्थ-कथनादवशिष्टं कादिमतेति नाम । किमिदं केवलं रूढिः ? किं वा योगोऽपीत्यभिप्रेत्य देवी पृच्छति—कथमिति । मयैतन्नाम-प्रवृत्ति-निमित्तं न ज्ञायते इति यदि ब्रूयात्तत्राह—महेश्वरेति । सृष्टि-स्थिति-संहृति-कर्मणामनायासेन सम्पादकस्य महैश्वर्यशालिनो भवत एतन्नाम-प्रवृत्ति-निमित्त-रचनस्य कर्तुं शक्यतया तदज्ञानं न सम्भवतीति भावः ।

ननु कादि-मतेति नाम्नः पूर्वमभिधानात्तन्निर्वचनमेव पूर्वमुचितं, किञ्च, नाम-त्रय-निरुक्तिः स्वयमेव कृता, कादिमतेति नाम-निरुक्तौ प्रश्नापेक्षा कुतः कृतेति चेत् सत्यं, एतदतिरिक्त-नाम-निरुक्तीनां स्व-प्रतिपाद्य-ग्रन्थे उत्कर्ष-विशेष-व्यञ्जकतया स्वयमेव पूर्वं तदुक्तिः, एतन्नाम्नस्तु रूढत्वेऽपि न क्षतिः, केवलं प्रश्नस्योत्तरं देयमिति न्यायादुत्तर-दानमित्यभिप्रायः । यद्वा रहस्यतरोऽयमर्थः प्रश्नं विना न निर्वक्तव्यः, यतो हि को ब्रह्मा तेन ह्रस्वाकारः, किं वा कस्यादिः षोडश-स्वरवर्गः षोडश-नित्यात्मकस्त्वन्मय इति तत्-प्रतिपादकोऽयं ग्रन्थस्त्वदीय एवेति भवति रहस्यमिति भावः ।

उत्तरयति—कादि-कालीति । दृष्टान्तार्थोऽयमर्थः । यथा

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

कादि-संज्ञा भवद्रूपा सा शक्तिः सर्व-सिद्धये ।
तन्त्रं मदुक्तं भुवने नव-नाथैरकल्पयत् ॥७॥

काली-नामधेय-शक्ति-विशेष-मत-प्रतिपादकं तन्त्रं मया कृतं लोके काली-मतमिति नाम्ना प्रसिद्धिमागतं, तथा कादि-संज्ञायाः शक्तेर्मतेन मया कृतस्य तन्त्रस्य नाम्ना कादि-मतमिति प्रसिद्धिस्तन्त्रस्यास्य लोके जातेति। कं जलं तस्यादि पृथिवी तद्वर्णस्य लकारस्य ललिता-नामादिम-वर्णत्वं यतोऽस्ति ततः कादिरित्येतन्नाम, कस्य आदि यस्मिन् यन्नाम्नीति विग्रहाश्रयणात्। निधिकृतस्त्वेवमाहुः— कस्य हिरण्यगर्भस्यादिरिति। यद्वा, कस्य जलस्य वर्णः ककार एतद्विद्योद्धारे प्रथममुक्त इति तथात्वम्। यद्वा, वक्ष्यमाण-नानाभेदेषु ककारादीनामपि भेदानामेतद्विद्यायां सत्त्वात् कादित्व-मेतच्छक्तेरिति रहस्यम्।

तन्त्रराज-पदमपि न केवलं रूढं किन्तु तत् सर्व-तन्त्राणां षोडश-नित्या-विषयक-सकल-तन्त्राणां राजत्वादन्वर्थम्। राजत्व-मेव कथमिति चेत् तत्राह—सर्व-सिद्धिदमिति एतद्विषयाणां सर्वेषाम् अपि तन्त्राणाम् एतद्विषयकानुष्ठान-प्रकार-प्रकाशकत्व-लक्षणायाः सिद्धेरेकत एव यतो गतार्थत्वं भवति ततोऽस्य राजत्वमिति ॥५-६॥

अतः परमेतत्-तन्त्र-प्रचारो लोके कथं जात इत्याकाङ्क्षायामाह— कादिरूं ज्ञेति। भवद्रूपा कादि-नामधेया सा अनिर्वाच्य-प्रभावा शक्तिर्वक्ष्यमाण-स्वरूप-नव-नाथ-द्वारा मदुक्तमेव कादिमत-संज्ञं तन्त्रं भुवने सर्वेषां साध्य-साधकादीनां सिद्धये स्वस्वाभिलषिता प्राप्त्यर्थम् अकल्पयत् प्रचारयति स्म॥७॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

तया तैर्भुवने तन्त्रं कल्पे कल्पे विजृम्भते ।
अवसानेषु कल्पानां सा तैः सार्धं व्रजेच्च माम् ॥८॥
आद्ये तन्त्रावतारादि द्वितीये नाथ-मण्डलम् ।
नित्योद्धारस्तृतीये स्याल्ललितार्चा तयोर्द्वयोः[1] ॥९॥

नेयं रीतिरस्मिन्नेव कल्पे किन्तु कल्पे कल्पे प्रतिकल्पं नवनाथ-द्वारैव कादि-शक्तिस्तन्त्रमिदं भुवने प्रचारयति। ननु प्रतिकल्पं नव-नाथ-द्वारा प्रचारणं तदा स्यात् यदि कल्पान्ते तन्नाशः स्यादित्यत आह—अवसानेष्विति। सा कादिशक्तिस्तैः नवनाथैः, व्रजेत् व्रजति। इत्यत्र प्रचारकाणां साधकानाञ्चाभावाल्लुप्तमिदं तन्त्रं पुनः कल्पादावुक्त-दिशा कादि-शक्तिः प्रसारयतीति भावः ॥८॥

तच्छृणु कादि-मतमित्यादिकोक्त्यापि न तावत् सोल्लासं शुश्रूषा समुदेति, यावत् तन्निरूपणीयार्थं स्व-जिज्ञासितत्व-प्रत्ययो न भवतीत्यतः शुश्रूषा-सिद्धये तव जिज्ञासिता एवामी मयाऽत्र निरूप्यन्ते इति बोधयितुं प्रथमत एवाग्रे निरूप्यार्थानादर्शयति—आद्ये इत्यादिना। अवतार उत्पत्ति-पूर्वको भुवने प्रचारः। आदिना गुरुशिष्य-लक्षणादिकम्। द्वितीये नाथ-मण्डल-प्रभृति, न तु तावन्मात्रम्। नित्यानां षोडश-संख्यानामुद्धार-प्रभृति तृतीये। नन्वेवमत्राप्यादि-पदमुपादेयं स्यादिति चेत् सत्यं, एवं तर्हि तन्त्रावतारादीति पदस्य तन्त्रावतारस्योत्तरोत्तर-तन्त्र-प्रचार-स्यादि मुख्य-भूतं कारणं गुरु-शिष्य-स्वरूपमित्यर्थः। तत्-पटले प्रतिष्ठादि-निरूपणं तु प्रासङ्गिकमेवेति भावः। एवमग्रेऽपि यद्-

1. V, r. Comm. ततो द्वयोः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

नैमित्तिकं तथा काम्यमर्चनं षष्ठके भवेत् ।
कामेश्वरी सप्तमके परतो भगमालिनी ॥१०॥
नित्यक्लिन्ना तु नवमे भेरुण्डा दशमे स्मृता ।
एकादशे वह्निवासिन्यथ वज्रेश्वरी मता ॥११॥
त्रयोदशे भवेद्दूती त्वरिता स्याच्चतुर्दशे ।
कुलसुन्दर्यतोऽन्यस्मिन् नित्यानित्या तु षोडशे ॥१२॥
ततो नीलपताका स्याद् विजयाऽष्टादशे परे ।
सर्वमङ्गलनित्याऽतो ज्वालामालिनि-संज्ञिता ॥१३॥

यत्-पटले यद् यदभिहितं तत्र तदेव मुख्यं तदितरत्तु प्रासङ्गिकमेवेति आदि-पदाद्यनुपादानादवगम्यते इति। ततो द्वयोः तृतीयानन्तरवर्तिनोर्द्वयोः पटलयोः चतुर्थ-पञ्चमयोः। यद्यप्येषा त्रिपुरसुन्दरी-पूजा तथापि ललितया सहैक्य-विवक्षया ललिता-पूजायास्तृतीय-खण्डे नैव वक्तव्यत्वाच्च ललितार्चेत्युक्तिः ॥८॥

परतः सप्तमात् परस्मिन् द्वितीये अष्टमे इति यावत् ॥१०॥

अथ एकादशानन्तरे द्वादशतमे इति यावत् ॥११॥

अतः चतुर्दशादन्यस्मिन् अनन्तरभाविनि, पञ्चदशतमे इति यावत् ॥१२॥

परे अष्टादशात् परस्मिन्नेकोनविंशे। अत इत्यत्रापि 'पर' इत्यनुषङ्गः, तथा च अतः परे एकोनविंशतितमात् परस्मिन् विंशतितमे इति यावत्। ज्वालामालिनि-संज्ञिता ज्वाला-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

एकविंशतिमे चित्रा कुरुकुल्ला त्वनन्तरे ।
त्रयोविंशे तु वाराही ध्यानानि तदनन्तरे ॥१४॥
पञ्चविंशे मातृकाभिः षड्विंशे मन्त्र-वैभवाः ।
सप्तविंशे श्वास-रूपम् अष्टाविंशे तु लोकता ॥१५॥
अनन्तरे कुण्ड-कल्पभिस्तदूर्ध्वे होम-कर्म च ।
एकत्रिंशे तदूर्ध्वे च होमाः काम्या महोदयाः ॥१६॥
त्रयस्त्रिंशे तु पटले यन्त्राणि फल-भेदतः ।
चतुस्त्रिंशे तु नर्माणि पञ्चत्रिंशेऽस्य वासना ॥१७॥

मालिनीति ऋस्वेकारान्त-पदेन संबोधित्वाच्छन्दोऽनुरोधाच्च पूर्वोक्त-क्रम-वैलक्षण्यम् ॥१३॥

अनन्तरे एकविंशतितमोत्तरभाविनि द्वाविंशतितमे । तदनन्तरे त्रयोविंशतितमादनन्तरे द्वितीये चतुर्विंशतितमे ॥१४॥

मातृकाभिर्जगद्व्याप्तिरस्तोत्यादिकं प्रतिपादितं पञ्चविंशति-तमाध्याये। श्वास-रूपं श्वास-स्वरूपं घटिकादि-घटकमित्यादिकम्। नित्याया लोकता सकल-लोक-स्वरूपत्वम् ॥१५॥

अनन्तरे एकोनत्रिंशत्तमे। तदूर्ध्वे तत एकोनत्रिंशत्तमा-दनन्तरे त्रिंशत्तमे। तदूर्ध्वे द्वात्रिंशत्तमे ॥१६॥

नर्माणि चमत्कारादि-कर्माणि। वासना विभावनीयोऽर्थः ॥१७॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Equipment Heritage Foundation, Jalgaon

षट्त्रिंशे स्वात्म-कथनमध्यायास्तत्त्व-विग्रहाः ।
प्रत्यध्यायं शत-श्लोकाः स्यादेवं तन्त्र-संग्रहः ॥१८॥
सुन्दरः सुमुखः स्वच्छः सुलभो बहु-तन्त्रवित् ।
असंशयः संशयच्छिन्निरपेक्षो गुरुर्मतः ॥१९॥
सौन्दर्यमनवद्यत्वं रूपे सौमुख्यता पुनः ।
स्मित-पूर्वाभिभाषित्वं स्वच्छताऽजिह्म-वृत्तिता ॥२०॥

स्वात्म-कथनमात्म-स्वरूपादि-कथनम् । अध्याय-पटल-पदयोः पर्यायतां सूचयितुमिदानीमध्याय-पदेन पटलोपन्यासः । एवम् उपदर्शितः तन्त्र-संग्रहः प्रस्तुत-तन्त्र-संगृह्यमाणोऽर्थः । तथा चैतावदर्थ-शुश्रूषावानत्र सावधानो भूत्वा शृणोत्वित्यभिप्रायः ॥१८॥

अत्र तन्त्रे प्रतिपाद्य उपासना-प्रकारः सर्वोऽप्युपासक-सापेक्षस्तमन्तरेणैतन्निरूपणमरण्य-रुदित-प्रायं स्यात्, सोऽपि च गुरु-सापेक्षः गुरु-मात्र-गम्य-सङ्केत-ग्रहमन्तरेण व्युत्पत्ति-सहस्रेणापि साम्प्रदायिक-प्रकारेणोपासितुमशक्यत्वात् । अतो गुरु-लक्षण-पूर्वकं शिष्य-लक्षणमेव पूर्वमभिधातुमुचितमित्यभिप्रेत्य क्रमेण तयोर्लक्षणमुपदर्शयति—सुन्दर इत्यादिना । अत्र गुरु-पदमपि सुन्दरादि-पदवद्विशेषण-परमेव, विशेष्य-पदन्तु "एवंविधो गुरुर्ज्ञेय" इत्यादि-द्वाविंशतितम-श्लोकस्थमेव गुरु-पदम् ॥१९॥

सुन्दर-पदस्य रमणीयाङ्ग एव प्रसिद्धतया तदुपादानं नेह कार्यमित्यभिप्रायेण तदर्थमाह—सौन्दर्यमिति । रूपे निन्दितत्वस्याभाव-मात्रमत्र विवक्षितं न पुनर्मनोहरत्वम् । तथा च, तत्र काणत्वान्धत्वच्छिन्न-नासत्व-श्वित्र-रोगादि निषिद्धं स्वापेक्षितं

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

सौलभ्यमप्यगर्वित्वं सन्तोषो बहु-तन्त्रता।
असंशयस्तत्त्व-बोधे तच्छक्ति[1]-प्रतिपादनात् ॥२१॥

गुरुत्वं यत्र चिकीर्षितमिति फलितार्थः। सुमुखत्वमपि न चन्द्र-मुखत्वादि-रूपं किं तु स्मित-पूर्वकाभिभाषण-स्वभावत्व-स्वरूपम्। तथा च क्रोधनत्वाभावो गुरोरुक्तः। लोके स्नान-शौचादिना शुद्ध एव स्वच्छ-पद-प्रयोगेऽपि तदत्रानादेयमित्यभिप्रेत्याह—अजिह्मेति। जिह्म-वृत्तिता कुटिलता परकीयानिष्ट-शीलतेति यावत्, एतेन पर-गुण-दोष-विज्ञान-शीलताभाजः सुसेव्यत्वं सूचितम् ॥२०॥

सुलभत्वं दरिद्रादीनां भिक्षाद्यर्थं यतस्ततः प्रचरतामपि सम्भवति, तथात्वं च नेह विवक्षितम् इतयभिप्रेतयाह—सौलभ्यमिति। तथा च स्वल्प-सेवनादिनापि शिष्याणामभीप्सितं साधयिष्यतीति भावः। बहुतन्त्रता बहूनि तन्त्राणि ज्ञान-विषयाणि यस्य सः, बहु-तन्त्रविदिति यावत्, तत्त्वं च सकलागम-ज्ञान-पूर्णतया सन्तुष्टत्वम्। तेन सत्यपि शिष्यादेर्दैवाज्ज्ञानाद्वाऽप-राधे न क्रोधं करिष्यतीति ध्वनितम्। असंशयत्वस्य बहु-तन्त्र-ज्ञानवतामेव सम्भवाद् बहु-तन्त्रविदित्यत एव गतार्थत्वमिति-शङ्का-निरास-चिकीर्षयाऽस्यार्थान्तरमाह तत्त्व-बोध इति। तत्त्वस्य बोधो यस्मिन्निति बहुव्रीहिः, एतावता शिष्य-गत-तत्त्व-बोधोऽप्येवं--भूत-गुरूपासनया भविष्यतीति ध्वनितम्। "संशयच्छिदि"ति सप्तमं विशेषणम्"प्यसंशय" इत्यनेनैवानुवदति। अत्र पक्षे, न विद्यते संशयो यस्मात्, यदनुग्रहात् संशय-नाश इति यावत्। तन्नाशे द्वारमाह—शिष्ये इत्यादिना। तस्य तत्त्व-बोधस्य शिष्ये

1. Comm. V. r. तच्छिष्ये प्रतिपादनात्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Equipment Heritage Foundation, Jalgaon

नैरपेक्ष्यमवित्तेच्छा गुरुत्वं हित-वादिता ।
एवं-विधो गुरुर्ज्ञेयस्त्वितरः शिष्य-दुःखदः ॥२२॥

प्रतिपादनात् उपदेश-द्वारा जननात् संशयच्छित्त्वमुपपन्नम् । "तच्छक्ति-प्रतिपादनादि"ति पाठे तस्मिन् शिष्ये शक्तेस्तत्त्व-बोधस्य प्रतिपादनात् सम्पादनादित्यर्थः । फलमर्थ-द्वये तुल्यमेव ॥२१॥

नैरपेक्ष्यं सकल-निरपेक्षत्व-लक्षणं शिष्यस्याप्यनपेक्षायां सम्भवति, नहि तथा-भूतो गुरुत्वेन सुलभ इत्यतस्तदर्थमाह— नैरपेक्ष्यमित्यादिना । तथा च परोपकार-चिकीर्षुः परम-कारुणिकः शिष्याणां दुर्गतानामपि सुलभो भविष्यतीत्यभिप्रायः । पित्राचार्यादि-बोधकत्व-भ्रम-निराचिकीर्षया गुरु-पदस्यार्थमाह— गुरुत्वमित्यादिना ।

यत्तु निधिकृता 'सुन्दर' इत्यादि 'गुरुरि'त्यन्त-नव-विशेषणैः प्रकाशादि-नव-नाथ-रूपत्वं गुरोरभिहितम्, तथाहि—सुन्दर-प्रकाशकत्वस्य प्रकाश-रूपालोके सत्त्वात् स्वप्रकाश-जनकत्व-सम्बन्धेन सुन्दर-पदेन प्रकाशो लक्ष्यते, तेन च तन्नामा नाथो (१)विवक्षितः । सुमुख-पदेन विमर्श-नामको नाथो(२) विवक्षितः, विमर्श-रूप-ज्ञान-भाजामेव क्रोधादि-विकार-विरहात् तत्-कार्य-भ्रू कुट्यादिकस्यासम्भवात् सुमुखत्वं भवति । स्वच्छ-पदेनानन्द-नामा(३) नाथोऽभिधीयते, शुद्ध-चित्तानामेवानन्द-प्राप्तेस्तद्वत्त्वादेव च तन्नाथस्य तादृशं नामधेयं भगवता निर्दिष्टम् । सुलभ-पदेन श्रीज्ञान-नामा नाथः(४) कथ्यते, ज्ञान-भाजामेव सुलभत्वात्, ज्ञानवत्त्वादेव च तस्य ज्ञानेति संज्ञा । बहु-तन्त्रविदित्यस्य सन्तोषवत्त्वार्थकतया सत्य-संकल्पवतामेव तथात्वेन श्रीसत्य-नामा (५) नाथ-विशेषस्तेन लभ्यते ।

CC-0. In Public Domain Sri Aurobindo Library

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

असंशय-पदस्य तत्त्व-ज्ञानवत्-परतया व्याख्यातत्वेन पूर्णताऽभि-हिता, ततश्च श्रीपूर्ण-नामा नाथः (६) प्राप्तो भवति। संशय-च्छिदित्यस्य तत्त्व-बोधकार्थकतया स्वभाव-प्रतिपत्ति-दातृत्वाव-गमेन स्वभाव-नामधेयो (७) नाथोऽवगम्यते। निरपेक्ष इत्यनेन प्रतिभ-नामा नाथो (८) विवक्षितः, पराधीनता-शून्यानामेव प्रतिभा-रूप-बुद्धि-विशेषशालित्वात् तद्योगादेव तस्य तादृश-नामकत्वोपदेशात्। गुरुरित्यनेन-सुभग-नामा (९) नाथोऽभिधीयते, सकल-हितवादिनामेव सौभाग्य-सम्पत्ति-दर्शनादित्यभिहितम्।

तत्रेदं वक्तव्यम्, किमेतानि विशेषणानि चिकीर्षित-गुरुत्वके नरे सर्वाण्यप्यपेक्षितानीत्यभिप्रायः? किं वा स्वगुरुरेवं रूपतया ध्येय इत्येतावानेवाभिप्रायः? किञ्च, मूल-वचनाथ-लभ्योऽयमर्थ इति तवाभिप्रेतम्? स्वातन्त्र्येण वा? नाद्यः, असम्भवात्, नहि यथा-श्रुतार्थ-प्रतीतार्थकान्यपि विशेषणानि क्वाप्युपलभ्यन्ते सुतरां भगवद्विवृतार्थकानि, का कथा भवदुक्तार्थकानां लाभ-प्रत्याशायाः। विशेषतः कलि-युगे तु तादृश-गुरु-प्राप्ति-चर्चापि न। न च सत्यादि-परमेवेदं विचारणं गुरु-शिष्ययोरिति वाच्यं, तथा सति यथा-तथा-भूतस्यापि तावन्मात्र-शास्त्र-ज्ञातुर्गुरुत्व-प्राप्ति-प्रसङ्गात्। न च तन्त्रान्तरोक्तम् एव तल्लक्षणमुपादेयमिति वाच्यम्, अन्यानपेक्षत्व-रूप-पूर्णताया एतत्तन्त्र-गताया भगवते-वोक्ततया तद्व्याघातापत्तेः। नचोक्त-लक्षणकस्य गुरोः कलि-युगे लाभाभावे तत्रैतदुपासनमेव लुप्यतामिति वाच्यं, कलि-युगे पुरश्चरणस्य चातुर्गुण्याभिधायकानां वक्ष्यमाणानामेतत्तन्त्रीया-णामेव वचनानां व्याकोप-प्रसक्तेः। नाप्यन्त्यः, साक्षाच्छिवतया स्व-गुरुर्ध्येय इत्यर्थस्य "यतो गुरुः शिवः साक्षादि"त्यादि-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Equipment Heritage Foundation, Jalgaon

चतुर्भिराद्यैः संयुक्तः श्रद्धावान् सुस्थिराशयः ।
अलुब्धः स्थिर-गात्रश्च प्रेक्षाकारी जितेन्द्रियः ॥२३॥

वक्ष्यमाण-वचनैर्भगवता एवोपदिश्यतया "सुन्दर" इत्यादि-वचनानां तथार्थ-बोधकत्वे प्रमाणाभावात्। द्वितीयेऽपि नाद्यः पक्षः, "चतुर्भिराद्यैः संयुक्त" इति शिष्य-लक्षण-प्रस्तावीय-वचनस्य व्याकोपापत्तेः। नहि तत्रापि प्रकाश-विमर्शादि-नाथ-तादात्म्यं विवक्षितं, सम्भवदुक्तिकं वा। "नहि बाधितमर्थं वेदोऽपि बोधयती"त्यतो भगवत्-तात्पर्यं सुन्दरादि-पदानां तदर्थ-पराणां "सौन्दर्यमनवद्यत्वमि"त्यादि-वचनानां च प्रकाशादि-नव-नाथ-प्रतिपादने नास्तीति निश्चीयते। द्वितीयस्तु पक्षोऽव-शिष्यते, नहि स प्रमाण-मात्र-ग्राह्यार्थकानां सुधियां चेतः सन्तोषयिष्यति।

इतरः उक्त-लक्षणानाक्रान्तः। दुःखदः काय-क्लेश-वित्ताप-हरणादि-प्रभव-दुःखदायकः, न तु मन्त्र-ग्रहणोद्देश्य-भूत-परम-पुरुषार्थ-लाभकरः, स्वस्यैव संशयाविच्छेदादिति भावः ॥२२॥

शिष्य-लक्षणेऽपि सुन्दरत्वादिकं कथित-स्वरूपमुपादेयम्। श्रद्धायाः स्थिर-चित्ततायाश्च विरहे मन्त्रोपासनायामेव वैधुर्यं भविष्यति, का कथा गुरूपासनायाम्। अलुब्धत्वं विना सत्यपि सामर्थ्ये धनदानं न करिष्यति, तथा च "गजाश्वा महिषो मेषे"त्यादि वचनातिक्रम-प्रयुक्तः प्रत्यवायः स्यादिति भावः। स्थिर-गात्रकत्व-विरहे गुरु-सेवा-मन्त्रोपासना-क्लेश-सहना-सम्भ-वात्। अदृष्ट-द्वारा चेदं विशेषणम् उपयुज्यते। प्रेक्षाकारी शास्त्रादि-प्रेक्षण-पूर्वकं कर्म-कर्ता। अतथा-भूतस्तु मत्-समान-

CC-0. In Public Domain Sri Aurobindo Library

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

आस्तिको दृढ-भक्तिश्च गुरौ मन्त्रे स-दैवते ।
एवं-विधो भवेच्छिष्यस्त्वितरो दुःखकृद् गुरोः ॥२४॥

शरीर-सुख-दुःख-क्षुधा-पिपासात्वानयं गुरुः कथं मत्तः श्रेष्ठतां भजतु इत्यादि दुर्मतिशाली कथं वा गुरु-भक्तिमान् स्यात्। इन्द्रियाणां यतस्ततो निषिद्धेष्वपि विषयेषु स्रक्-चन्दन-वनितादिषु संचारण-शीलो हि न गुरु-सेवा-मन्त्रोपासना एकाग्रतया कर्तुं प्रभवति ॥२३॥

परलोक-विषयकास्तित्व-मतेरेव देवताद्युपासना-क्लेशेषु स्पृहा भवति, न नास्तिकस्य। प्रकृत-मन्त्र-प्रकृत-देवता-प्रकृत-गुरुषु दृढा दुष्ट-वचन-श्रीमन्त्रान्तर-देवतान्तर-कल्याकर्णनाद्यनपनोद्या भक्तिः प्रीतिरेव शेष-रूपा यस्यास्ति स एव प्रकृत-गुरोः सकाशात् प्रकृत-देवतायाः प्रकृत-मन्त्रं गृहीत्वा भजनं करिष्यतीति स एव शिष्यतायामधिकृतिमवलम्बते, नाखिलः। इतरः कथित-लक्षण-शून्यः दुःखकृद् "वृथा मन्त्रः प्रदत्त" इत्यादि-पश्चात्ताप-प्रयोजकः,

"पत्यौ पत्नी-गता दोषाः सन्ति चामात्य-सङ्गताः ।
एवं शिष्य-गता दोषा गुरावायान्ति सर्वथा ॥"

इत्यादि-वचन-प्रतिबोधित-प्रत्यवाय-प्रयोज्य-दुःख-कारकश्चेति।

अत्रेदं विचारणीयम्, एवं-विध-गुरु-शिष्ययोरलाभात् किं निर्विषयमेवेदं शास्त्रम्? आहोस्वित् सत्य-युगादौ तथा लाभ-सम्भवात्तन्मात्र-विषयम्? किंवा, सर्वथैवालभ्य-गुणातिरिक्त-गुणान् परीक्ष्य गुरु-शिष्यावादेयाविवेति? तत्र नाद्यः पक्षः, कस्याप्येवंविधस्याभावे श्रीशिव-प्रणीत-वचनानां वैयर्थ्य-प्रसङ्गात्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Equipment Heritage Foundation, Jalgaon

गुरूच्यमाने वचने दद्यादित्थं वचः सदा ।
प्रसीद नाथ ! देवेति तथेति च कृतादरम् ॥२५॥

कलि-युगेतर-परता तु दूषिता प्रागेवेति [पृ० २०] न द्वितीयः पक्षः। तृतीयस्तु पक्षो युज्यते। अत एव परिषल्लक्षणाक्रान्तानामिदानीमसम्भवाद् युगान्तर-परतयापि "कलौ पाराशरी स्मृति-" रिति विरोधिन नेतुमशक्यतया कुतः प्रायश्चित्तं पापस्यानुष्ठेयमिति पूर्व-पक्षं कृत्वा—

"युगे युगे च ये धर्मास्तत्र तत्र च ये द्विजाः ।
तेषां निन्दा न कर्तव्या युग-रूपा हि ते स्मृताः ॥"

इति पराशर-वचनम् अवलम्ब्य कथमप्यशक्य-परिहारं कर्तुर्गुण-गणमनादृत्यापर-सकल-गुणवत्त्वेनैव परिषत्त्वं द्विजानामभ्युपेत्य कलिमुपजीव्य भगवता पराशरेण प्रवर्तितोऽयं प्रायश्चित्त-विधिः सफलीकरणीय इति सिद्धान्तितं माधवादिभिरिति ध्येयम् ॥२४॥

अथ शिष्य-कर्तृक-गुरु-सेवा-प्रकार-प्रदर्शन-मिषेणेदृशाचार-विहीनोऽपीतर-पद-ग्राह्यो भवतीत्याह—गुरूच्यमान इत्यादिना। इत्थमिति। किमित्याकाङ्क्षायामाह—प्रसीदेत्यादि। सदा गुरुणा आज्ञप्ते सति इत्थम् इत्येव सत्यम् इदमाज्ञप्तं वचनम् एवमेव इत्यर्थकं वचः प्रत्युत्तरं वचनं शिष्येण आदेयमित्यर्थः। न केवलमित्थमेव वाच्यं किन्त्वन्यदपीति दर्शयति—प्रसीदेत्यादिना। देवेति च वचो दद्यादिति पूर्वेणान्वितम्। तथा यथाज्ञप्तं तथैवाहं सम्पादयिष्यामि इदमपि प्रत्युत्तर-वचनं सादरमभिलपनीयं नावज्ञा-पूर्वकम् ॥२५॥

CC-0. In Public Domain Sri Aurobindo Library

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

प्रणम्योपविशेत् पार्श्वे तथा गच्छेदनुज्ञया ।
मुखावलोकी सेवेत कुर्यादादिष्टमादरात् ॥२६॥
असत्यं न वदेदग्रे न बहु प्रलपेदपि ।
कामं क्रोधं तथा लोभं मानं प्रहसनं स्तुतिम् ॥२७॥
चापलानि च जिह्मानि नर्माणि परिदेवनम् ।
ऋण-दानं तथाऽऽदानं वस्तूनां क्रय-विक्रयम् ॥२८॥
न कुर्याद् गुरुणा सार्धं शिष्यो भूष्णुः कदाचन ।
यतो गुरुः शिवः साक्षात्त स्तुवन् प्रणमन् भजेत् ॥२९॥

सत्यामुपवेशनाज्ञायां गुरोः पार्श्वे उपविशेत् । गमनाज्ञायां तु सत्यां गच्छेच्छिष्यः । "इत्यम्" इत्यनेन "तथे"त्यनेन च गुर्वाज्ञप्त-पदार्थस्याङ्गीकार-मात्रम् उपदिष्टम्, "आदिष्टं कुर्यात्" इत्यनेन तदर्थानुष्ठानं बोधितमिति न पौनरुक्त्यम् ॥२६॥

कामः गुरु-वस्तु-लाभ-विषयिणी स्पृहा । क्रोधः द्वेष-प्रयोज्य-चित्त-वृत्ति-विशेषः । लोभः गुरु-दत्तादप्यधिकार्थ-लाभेच्छा । मानः कुल-विद्यादिभिरधिकस्यापि स्वस्मिन् गुर्वपेक्षयाधिक्य-बुद्धिः । ईषद्धास-मुखत्वं त्वपेक्षितमेवेत्यभिप्रेत्य प्रहसनमेव निषेधितम् । स्तुतिः स्वस्य, गुरु-देवतयोः सकाशात् परस्य च ॥२७॥

चापलं वृथा चेष्टा तृणच्छेद-भूलिखनादि-रूपा । जिह्मं कौटिल्यम् । परिदेवनम् असम्बद्ध-विलापः ॥२८॥

भूष्णुः स्वस्य भव्य-कामः । उक्तार्थ-व्यतिक्रमे स्वस्यानिष्टमापद्येतेत्यभिप्रायः । ननु यत्र शिष्यस्य दान-सामर्थ्यं नास्ति तत्र स्वतः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Equipment Heritage Foundation, Jalgaon

यथा देवे तथा मन्त्रे यथा मन्त्रे तथा गुरौ ।
यथा गुरौ तथा स्वात्मन्येवं भक्ति-क्रमः प्रिये ॥३०॥
गुरोस्तु जन्म-दिवसे कुर्यादुत्सवमादरात् ।
विशेष-पूजां योगिभ्यो भोजनं तत्पदार्चनम् ॥३१॥

परतो वा ऋणादानादि-व्यवहारं विना गुरोरशन-वसनादि-क्लेश-प्रसक्तौ गुरुणाऽतिनिर्बन्धे नर्म-क्रियादि-प्रार्थनायाञ्च किमनुष्ठेयम्? आज्ञा-करणे इदानीमेव दर्शित-निषेधोल्लङ्घनेन प्रत्यवायः प्रसज्येत, तदकरणे आज्ञोल्लङ्घन-निषेध-वचनैः प्रत्यवायस्तदवस्थः, गुरोरशन-वसनादि-दुःख-प्राप्ति-प्रयुक्त-प्रत्यवायोऽधिकश्चाऽऽपद्येत, सेयमुभयतःपाशा रज्जुरित्याशङ्क्याह—यतवित्यादि। अयं भावः, नहि तेन सह व्यवहारं कलञ्ज-भक्षणादिवत् सर्वथा निषेधयामः, किन्तु कृते व्यवहारे तस्यापमानादि-सम्भावना भवतीति तन्निषेध-वचनानां तात्पर्यम्। यदि तु भगवति श्रीशिव इव तत्रापि दृढतरा भक्तिः कथमपि नापसरति, तदा व्यवहारेऽप्यावश्यके न नो विद्वेष इति ॥२९॥

स्वात्मनि सर्वेषां प्रीतिरित्यविवादं, तद्दृष्टान्तेन गुर्वादौ प्रीति-दार्ढ्यं कार्यमित्युपदिशति—यथेत्यादिना ॥३०॥

न केवलं मानस्येव भक्तिरावश्यकी किन्तु तत्-पुरःसरं बाह्या-भ्यर्चनादिक्रममपि नियतमित्याह गुरोरित्यादिना। उत्सवः पूजा-ब्राह्मण-भोजनादि-लक्षणः। उत्सव-पदार्थं स्वयमेव विवृणोति विशेषेत्यादिना। अधिकाधिक-नैवेद्य-पञ्चामृतच्छत्रादर्श-चामर-व्यजन-वितान-पादुकाद्युपचार-घटितत्वमेव विशिष्टत्वं पूजायाः।

CC-0. In Public Domain Sri Aurobindo ...

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

व्याप्ते दूरं-गते पूज्ये पूजयेदग्रजादिषु ।
एक-देशे नित्य-सेवा दूरस्थे योजन-क्रमात् ॥३२॥
एकादि-ऋतु-संवृद्ध्या वर्षे षड् योजनान्तरे ।
ततो दूर-गते सेवा तदाज्ञा-परिपालनम् ॥३३॥

योगिनो देव्यभेद-भावना-परिशीलित-मनस्काः । तत्-पदं योगि-पदम्, गुरु-पूजायाः पूर्वमुक्तत्वात् ॥३१॥

व्याप्ते पर-लोकमुपेते । अग्रजादीत्यादि-पद-ग्राह्यं "गुरुं तदग्रतः प्राप्त-विद्यम्"इत्यादिना स्वयमेव वक्ष्यति । दूर-गते षड्योजनापेक्षयाऽधिको यो देशस्तत्र गते सति । गुरु-शिष्ययोरेक-देशावस्थाने तु नित्यमेव गुरुं पूजयेत् । दूरस्थत्वं हि देशान्तरावस्थितत्व-रूपं नाना-प्रकारैर्भवति । तत्र स्वाव-स्थिति-देशमपेक्ष्य एक-योजन-दूरस्थे गुरौ मास-द्वयात्मकैकर्त्तु-मध्यत एकस्मिन् दिने तद्दर्शन-पूजादि-रूपा सेवाऽनुष्ठेया । योजन-द्वय-दूर-गते मास-चतुष्टयाभ्यन्तर-रूपर्तु-द्वयाभ्यन्तरे, त्रि-योजन-दूरे ऋतु-त्रयाभ्यन्तरे, चतुर्योजनाधिक-दूरे ऋतु-चतुष्टयाभ्यन्तरे, पञ्च-योजनाधिक-दूरे पञ्चर्त्वभ्यन्तरे, षड्भिर्योजनैरन्तरे गुरु-शिष्ययोर्व्यवधाने सति वर्षाभ्यन्तरे अवश्यं तत्-पुरीं गत्वा प्रत्यक्ष-गुरु-सेवाचरणीया । "एकादि-ऋतु-संवृद्ध्ये"त्यतः प्राप्त एवार्थो "वर्षे षड् योजनान्तर" इत्यनेन स्पष्टीकृतः । षड् योजना-दधिक-दूर-गते तु गुरौ नेदमृतु-वृद्धितः सेवनमिति ज्ञापनं तदन-न्तरानभिधान-विशिष्टस्य स्पष्टीकरणस्य फलम् ।

कथं तर्हि तत्र सेवा-प्रकार इत्याकाङ्क्षायामाह—ततवित्यादि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

आसनं शयनं वस्त्रं भूषणं पादुकां तथा ।
छायां कलत्रमन्यच्च यत्तस्पृष्टं[1] तु पूजयेत् ॥३४॥
एक-ग्रामे पृथक्-पूजां न कुर्यादननुज्ञया ।
पूजा-मध्ये समायाते पूज्ये नत्वा स्थितिं वदेत् ॥३५॥
विधेर्हि शेषमित्युक्तः कुर्यान्नो चेत्तदाज्ञया ।
वर्तेत सोऽपि तच्छेषं कुर्यान्निश्चल-मानसः ॥३६॥

ननु व्याप्ते दूर-गते वा तदग्रजादि पूजयेदिति पूर्वमुक्तमेव, तत् किमर्थं पुनरिदमुच्यते ? इति चेत् सत्यं, वचन-द्वय-दर्शनादर्थ-द्वयमपि समुच्चितमनुष्ठेयमिति नैष दोषः ॥३२-३३॥

छायां तदीय-सुवर्णादि-निर्मित-प्रतिकृतिम् । अन्यत् पीठादि । तत्-स्पृष्टं तदुपभुक्तम् ॥३४॥

ग्राम-पदस्य उपलक्षणतया नगरादिकम् अपि ग्राह्यम् इति मनोरमाकारः, एतच्च द्वयमपि समुच्चितम् अनुष्ठेयमिति न, "एकदेश" इति पूर्वोपस्थितम् अपि विहाय ग्राम-पदोपादानं भगवतो देशे नगरे च स्वतन्त्र-पूजां न निषेधतीति प्रतीमः । अननुज्ञयेति । आज्ञया पुनरेक-ग्रामेऽपि पृथक् पूजाऽभ्युपेयैव । का कथैक-देशस्य । एतेन स्व-ग्राम-पुर-देशादिषु यथोक्त-लक्षणक-गुरोरलाभे दूर-दूरतर-देशं गत्वापि गुरुरन्वेषणीय इति भगवताऽभ्यनुज्ञातम् ।

पूज्ये गुरौ । अन्य-साधारण-पूज्यत्व-विवक्षायाम् "अन्ये वापी"

1. V. r. Comm. यत्तत्स्पृष्टं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

पूजा-मध्ये गुरौ पूज्ये त्वन्ये वाऽपि समागते ।
कृत्यमेवं समुद्दिष्टं मौनं तेनं समाचरेत् ॥३७॥
गुरुं न मर्त्यं बुध्येत यदि बुध्येत तस्य तु ।
न कदापि भवेत्सिद्धिर्मन्त्रैर्वा देव-पूजनैः ॥३८॥
मन्त्रेण तस्य नियतं पूजां कुर्याद्यथोदिताम् ।
तां च तत्पटले सम्यग् ज्ञात्वा भक्ति-समन्वितः ॥३९॥

त्यग्रिम-ग्रन्थ-विरोधापत्तिः । तथाच ग्रामान्तरतः समायाते स्व-गुरौ पूजा-मध्यस्थितोऽपि शिष्यः समुत्थाय तं नत्वा चरण-स्पर्शन-पूर्वकं प्रणम्य स्थीयतामिति संप्रार्थ्य वर्तेत तूष्णीं तिष्ठेत् । यदि तु पूजा-शेषं समापयेति गुरोराज्ञा स्यात् तदा गुरोरग्रे कथं कर्म कर्तव्यमिति, मनो-विकल्पादि-चाञ्चल्यमपहाय पूजा-शेषं समापयेत्, नो चेद् गुरोराज्ञानुसारेण कर्मान्तर-मनुष्ठेयम् ॥३५-३६॥

गुरोरग्रजादिषु गुरुवत् पूज्येष्वागतेष्वपि पूर्वोक्तं कर्मातिदिशति—पूजा-मध्ये इत्यादिना ॥३७॥

गुरोर्मर्त्यत्व-बोधः प्रत्यवाय-प्रयोजक इति न मर्त्यं बुध्ये-तेत्यनेनोक्तम् । अथ यदि मन्त्राराधन-देव-पूजादिभिस्तत्-प्रत्यवाय-परिहारं स्वाभिमत-सिद्धिञ्च साधयिष्यामीति ब्रूयात् तत्राह—यदीत्यादि ॥३८॥

दूर-गुरोः पूजा पूर्वमुपदिष्टा, तत्र मन्त्रेति-कर्तव्यताकाङ्क्षाया-माह—मन्त्रेणेत्यादि । यद्यपि द्वितीये पटले वक्ष्यमाणा सा

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

नित्यानां त्रैपुराणां च नावेक्ष्यास्त्वंशकादयः ।
तथाप्यत्रोच्यते किञ्चिदभिचारादि-सिद्धये ॥४०॥

न तूदिता तथापि पूर्व-कल्पीय-द्वितीय-पटलाभिप्रायेणेदानीं कल्पे तथोक्तिः । अत एव कल्पे कल्पे तन्त्रमेतद् विजृम्भते इति पूर्वमुक्तम् । यद्वा, पूर्वमुदिता कर्तव्यत्वेन प्रतिपादिता या पूजा तामुद्दिश्य मन्त्र-विशेष-मात्रं विधीयत इति नोक्त-दोषः ।

तां पूजां तत्-पटले नाथ-पूजा-पटले द्वितीये इति यावत् । ज्ञात्वेति कुर्यादिति—पूर्वेणान्वितम् ॥३८॥

अग्रे वक्तव्यांशकादि-विचारस्य प्रकृतानुपयुक्तत्व-शङ्कां स्वयमेव ज्ञात्वा परिहरति—नित्यानामित्यादि ।

ननु कुत इत्थमवगतं यन्नित्यादिकानां नक्षत्र-राशि-सिद्धादि-चक्रादि-शुद्धिर्नापेक्षितेति चेत्, तत् किमिदमेव वचनं तथा न बोधयेत् ? नित्यानां कामेश्वर्यादि-रूप-प्रकृत-तन्त्र-प्रतिपाद्य-पञ्च-दश-नित्यानां विद्यानामिति शेषः । नेह नित्या-रूप-देवतानामंश-कादिकं विचारणीयमस्ति । देवता-विद्ययोरभेदमभ्युपेत्य वा तथोक्तिः । त्रैपुराणामिति अध्याहृत-विद्यान्वितम् "वधाय दुष्ट-दैत्यानामि"त्यादिवत् प्राधान्य-सूचनाय पृथग्निर्दिष्टम् । यद्वा, नित्यान्वितमिदं, त्रिपुरा-सम्बन्धान्नित्यानामन्येषामप्यंशकाद्यन-वेक्षणे का कथा त्रिपुराया इति भावः । अंशकादयः नक्षत्र-राशि-सिद्धादि-धनर्ण-कुलाकुल-चक्र-शुद्धयो मन्त्र-गत-वैरि-भावश्च ।

यद्यपि "नक्षत्रोदय" इति "भादि-शुद्धय" इति सर्वज्ञेन भगवता प्रणेतुमुचितं न लिख्यं, अंशक-पदस्य नक्षत्रे प्रसिद्ध्यभावात, तथाप्यंशान् ज्ञात्वैव नक्षत्र-शुद्धिर्विचारणीया, न तु संपूर्णस्येत्यभि-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

अश्विन्यादिषु ऋक्षेषु बिन्दु-सर्गान्त्य-वर्जितम् ।
चतुरो[1] योजयेदाद्यान् बिन्दु-सर्गौ तु सर्वगौ ॥४१॥

प्रायेणांशक-पदं नक्षत्रे प्रयुक्तम् । अंशैः कं विभाग-सुखं यस्येति व्युत्पत्त्येति द्रष्टव्यम् । अत्र एतद्देवता-मात्र-विषयके प्रकृत-तन्त्रे । एतेन तन्त्रान्तरोक्ता नक्षत्रादि-शुद्धिर्देवतान्तर-विषयेति ध्वनितम् । वक्तव्यार्थस्यातिगूढतया तच्छ्रवणाय सावधानतां विधातुम् उच्यते इति पुनः प्रतिजानाति । गूढत्वादेव विशेषतो नामानुक्ति-पूर्वकं किञ्चिदित्युक्तिः । अभिचारः शत्रु-मारण-कर्म । आदिना द्वेषणादिः ॥४०॥

साध्य-विषयकोपदेश-संग्रह-नक्षत्रादि-शोधन-प्रकारमुपदर्शयति अश्विन्येत्यादिना । अत्र ऋक्ष-पदं राशि-परं, तथा चाश्विन्यादि-सप्तविंशति-नक्षत्रेषु मेषादि-द्वादश-राशिषु चत्वारो वर्णा अ आ इ ई इत्येवमादि-रूपा योजनीयाः ।

ननु नक्षत्राणां सप्तविंशति-संख्यत्वाद् वर्णानामेकपञ्चाशत्-संख्यत्वाच्चतुश्चतुर्विभागेऽपि न संपूर्ण-वर्ण-योजनं सम्भवतीति चेन्न, एकैक-नक्षत्रस्य षष्टिः षष्टिर्घटिका भवन्तीति नव-पादानां पञ्च-त्रिंशदुत्तरैकशतं घटिका भवन्तीति । तेषु प्रोक्त-दिशा चतुश्चतु-र्वर्णानां योजने एकैकं वर्णस्य पादोन-चतुस्त्रिंशद् घटिकाः पर्यवस्यन्ति । तथाचाश्विन्यादि-नक्षत्राणां सर्वेषां प्रत्येकं चतुश्चतुरक्षरकत्वं न यथाश्रुतं भ्रमः, किन्तु अश्विन्यादि-नव-नव-पाद-परिमित-नक्षत्राणाम् । राशीनां तु प्रत्येकमेव चतुरक्षर-

1. V. r. Comm. चत्वारि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

कत्वम्, नक्षत्राणां तु प्रत्येकं सपाद-द्वि-द्विपरिमितानां प्रत्येकं चतुश्चतुर्वर्णकत्वमिति विवेकः। एवमपि चाष्टाचत्वारिंशद्-वर्णानां योजनं जातं नाधिकानामित्यत्राह बिन्द्वित्यादि। सर्गो विसर्गः अन्त्यः क्षकारः बिन्दु-विसर्गयोर्नामादि-भागे क्वापि दर्शनाभावात् क्ष-कारस्य च संयुक्ताक्षरस्य स्वपूर्व-भागावस्थित-ककारानुकूल्य-विचारेणैव चारितार्थ्यान्न पृथग् गणनमिति भावः।

नन्वेवं तन्त्रान्तरे तदुपादानं व्यर्थं स्यात्? न स्यात्, रेवत्यादि-नक्षत्र-न्यासस्य तत्तद्वर्ण साहित्येनानुष्ठानाय तथा गणनात्। प्रकृते तु तन्त्रान्तरोक्तो न्यासोऽप्यनुपादेय एव। नन्वेवं सिद्धादि-चक्रे अन्योक्ततद्वर्ण-त्रय-लिखनं मूलकृतो व्यर्थं स्यात्? न स्यात्। अत एव ज्ञापकात्

"नाद्यन्तयोः सिद्ध-वर्णौ मन्त्रे यस्मिन् वरानने।"

इत्यादिकस्य कमलायां स्पष्टीकरणीयस्य विचारस्यात्र तन्त्रे संग्रहः। किञ्च मन्त्रयोः प्राथमिक-वर्णयोरिव तन्त्रान्तरोक्त-द्वितीयादिक-मन्त्र-वर्णानामपि द्वितीय-वर्णानुकूल्य-मवेक्षणीय-मिति निश्चिनुमः। चत्वारि चतुः-संख्यान् वर्णान् आद्यान् अकार-प्रभवान् अष्टाचत्वारिंशद्वर्णान्। अः अकार आद्यो येषामिति विग्रहाश्रयणाच्चोक्तार्थ-लाभः। दिव्यश्चायं विशेष्य-विशेषणयोर्विभिन्न-लिङ्गक-भावः। यद्वा, चत्वारि अक्षराणि योजयेत्, कान् वर्णान्? इत्याकाङ्क्षायाम् आद्यानिति। ननु क्षकारस्य संयुक्ताक्षरतया मा भून्नाम पृथग्गणनम्, बिन्दु-विसर्गयोस्त्वपलपनं कथं युज्येत? इत्यत्राह बिन्दु-सर्गाविति सर्वगौ सर्व-वर्ण-साधारणौ सर्व-वर्ण-पारतन्त्र्येणोच्चारणार्हौ। यद्वा, सर्वगौ एकोनपञ्चाशत्-प्रमितापर-वर्णगौ। सगाभ्यां वकारेण च तत्-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

तेन मन्त्रादि-वर्णेन नाम्नश्चाऽऽद्याक्षरेण च ।
गणयेद् यत्र षष्ठं वाऽप्यष्टमं द्वादश तु वा ॥४२॥

संख्यावगमात्, न स्वातन्त्र्येणेति न पृथग् गणिताविति भावः ॥४१॥

एतद्योजन-फलमाह—तेनेत्यादिना । तेन प्रोक्त-रीत्या नक्षत्रेषु राशिषु च संयोजितेन मन्त्रीय-प्राथमिक-वर्णेन नाम्नः प्राथमिक-वर्णेन च गणनाम् अनुसरेत्, साध्य-राशिमारभ्य षष्ठोऽष्टमो द्वादशतमो वा मन्त्रस्य राशिर्यदि भवति तदा स मन्त्रस्तत्-साध्यस्याहितकारो स्यात्। एतावता तं मन्त्रं स्व-हित-कामो नादद्यादिति ध्वनितम्। यदि तु स्व-प्रत्यर्थिनो नाम-प्राथमिक-वर्णान्मन्त्र-प्राथमिक-वर्णः षष्ठाष्टम-द्वादश-राशिकः स्यात् तदा स मन्त्रस्तदनिष्टकारी भवतीति तदनिष्ट-विधित्सुना स मन्त्र आदेयः। एतावता तं मन्त्रं स्व-हित-कामो नादद्यादित्युक्तम् ।

अत्रेदं रहस्यं, रिपोरिति षष्ठमष्टमं द्वादशमित्यत्राप्यन्वेति। रिपोरिति षष्ठ्यास्तत्-स्वामिकत्वमर्थस्तेन स्व-राशि-स्वामिना सह षष्ठादि-राशि-स्वामिनां रिपुत्व एवोक्तो दोषः, मित्रत्वे तु नेति ध्वनितम्। तन्त्रान्तर-संवादी चायमर्थः। एवं प्रोक्त-प्रकारेण स्व-नाम-प्रथम-वर्ण-नक्षत्रान्मन्त्र-प्रथम-वर्ण-नक्षत्रं गणयेत्। तत्र तृतीय-पञ्चम-सप्तमान्यतम-संख्यं नक्षत्रं यस्य मन्त्रस्य, भवति स मन्त्रः स्वस्य नादेयः, आदेयश्च रिपु-नामाद्यक्षर-नक्षत्रतस्तृतीयादि-संख्य-नक्षत्रक-स्व-प्रथम-वर्णक-मन्त्रो रिपुगतानिष्टविधित्सोः साधकस्येत्यर्थः ॥४२॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

रिपोर्मन्त्राद्य-वर्णं स्यात् तेन तस्याहितं भवेत् ।
राशिष्वन्यत्र ऋक्षेषु सप्त-पञ्च-तृतीयगैः ॥४३॥

राशिष्विति पूर्वान्वयि। राशिषु पूर्वोक्त-रीत्या साधित-राशीनां मध्ये षष्ठाष्टमादि-संख्यमितप्रर्थः पर्यवस्यति। राशिष्वितत्र "उक्तम् इति शेष" इति **मनोरमा**कारः। अन्वयादरणादेव सामञ्जस्येऽप्यध्याहार-कल्पनस्याभिप्रायं न विद्मः।

तन्त्रराज-टीकानुमत-राशि-चक्रम्



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

अन्यत्र ऋक्षेषु राश्यतिरिक्तेषु ऋक्षेषु नक्षत्रेष्विति यावत्। पूर्वं राशिष्वपि ऋक्ष-पद-प्रयोग-करणात् तद्भ्रम-निराकरणायान्यत्रेति। ननु अश्विन्यादि-नक्षत्राणां पूर्वमभिधानात् "षष्ठम्" इत्यादिना राशि-फलस्य पूर्वमभिधानं सन्दर्भ-विरुद्धं, "ऋक्षेषु सप्त-पञ्च-तृतीयगैरि"त्यस्यैव पूर्वमभिधातुम् उचितत्वादिति चेत् सत्यं, (अवपहतया ?) अंशकादय इत्यत्र प्राथम्या-"च्चाश्विन्यादिषु ऋक्षेष्वि"त्यादि-पद्ये पूर्वम् अभिधानेऽपि (अवेपित्तया ?) वर्णानामकारादीनां योजनस्य सुबोधतया तत्-फलस्य शीघ्रं येन केनाप्यधिगन्तुं शक्यतया च राशीनामेव फलाभिधानं प्रथमम् आदृतम्। छन्दोऽनुरोधेन "सप्त-पञ्चे"त्यादि-व्युत्क्रमादरणम्। दुष्ट-गणनायां दुष्टोत्तम-दुष्ट-मध्यम-दुष्टाधम-क्रम एवादर्तुमुचितः। भवति हि वध-रूप-सप्तम-ताराम् अपेक्ष्य प्रत्यरितारा दुष्टतया किञ्चिन्न्यूना, ततोऽपि विपद्रूपा तृतीयतारेति भगवतोऽभिप्रायः। तृतीयगैरिति सप्त-पञ्च-तृतीयानि नक्षत्राणि स्वनामादि-वर्ण-नक्षत्रापेक्षया येषु मन्त्रेषु प्रथम-भागे गतानि तादृशैर्मन्त्रैरित्यर्थः। अहितं भवेदित्यत्र (चैतदधप[1] ?)

* * *

मनोरमाकृतस्तु "अश्विन्यादिषु ऋक्षेषु मेषादि-राशिषु, अंशकादय इत्यत्रांशक-पदमपि राशि-वाचकमेव, ऋक्षेषु अश्विन्यादि-नक्षत्रेषु, सप्त-पञ्च-तृतीयगैः प्राग्वद्रिपु-नामाद्यक्षर-नक्षत्रमारभ्य मन्त्राद्यक्षर-नक्षत्रान्तं[2] गणिते सप्त-पञ्च-तृतीय-नक्षत्र-गताद्य-वर्णकैर्मन्त्रैस्तस्याभिचारादिकं कुर्यादित्यर्थ" इति वदन्ति।

(1) Here one folio of the MS. is missing.

(2) In the printed ed. of the मनोरमा, the reading, however, is given as राश्यन्तम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

अश्विन्यादि-पदे राशि-प्रतिपादन-कथनम् अतिसाहसम्, अश्विनी-नक्षत्रम् आदि-भूतं यत्रेति व्युत्पत्त्या मेशादि-राशि परत्वेन नक्षत्राणां वर्णप्रतिपादने सप्त-पञ्चेत्याद्युक्त-विचारानापत्तिश्च। न च राशीनां चतुरक्षरकत्वोक्त्याऽर्थादेवैकैक-राश्यवयव-नव-पाद-परिमित-नक्षत्राणां चतुरक्षरत्वोक्त्या पूर्वोक्त-रीत्या पादोन-चतुस्त्रिंशद्-घटिका-रूपांश-लाभाद्वर्ण-लाभो दुर्निवार इति वाच्यं, नक्षत्राणां तन्त्रान्तरे स्वन्यास्य-वर्ण-दर्शनेन विशेषोक्तिं विना आर्थिक-तत् प्राप्तेरसम्भवात्। न च ऋक्ष-वर्णानुक्त्या तद्विचारस्य तूक्त्या तथा कल्पनीयमिति वाच्यम्, एवं तर्हि ऋक्ष-वर्णानामपि यथा मूलान्नाभस्ताद्दश एवार्थे कुतस्ते प्रद्वेष इति न जानीमः। समुच्चायक-च-कारानुक्तिरेव द्वेष-वीजमित्यपि न साधीयः, ऋक्ष-पदस्य राशावपि प्रयोगादश्विन्यादि-पदस्याभेदान्वय-बुद्ध्या नक्षत्र-बोधो मा भूदिति, तदर्थ-गूढत्वार्थं चकारानुक्ति-सम्भवात्। परे तु, अंशकादयः अंशक-नक्षत्र-राशयः। बिन्दु-सर्गाभ्याम् अन्त्ये स्वस्व-चरम-भागे वर्जितं वर्जनं यथा स्यात् तथा अकारादि-वर्णान् योजयेदेकैक-नक्षत्रे केवलानकारादि-वर्णानिति यावत्। तथा बिन्द्वन्ताः सर्व एव वर्णाः करणीयाः, विसर्गान्ताश्च सर्वे वर्णाः कार्याः। तथा च अ क ख गाः केवला अश्विन्याः, घ ङ च छाः केवला भरण्याः [झ, ज, ट (?) ज झ ञ टाः] केवलाः कृत्तिकायाः इत्यादि-रीत्या अश्विन्यादिकाश्लेषान्त-नव-नक्षत्राणां केवल-मातृका एव; तदुत्तरं मघादि-ज्येष्ठान्त-नव-नक्षत्राणां चतुश्चतुः-क्रमेण सबिन्दवः अं कं खं गं घं ङं चं छं इति रीत्या दर्शितास्चतुश्चतुर्वर्णाः, ततो मूलादि रेवत्यन्त-नव-नक्षत्राणां सविसर्गाः अः कः खः ग

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

इत्यादि-रीत्या चतुश्चतुर्वर्ण-क्रमेण षड्भिषन्मा (?) इति मिलित्वा षट्त्रिंशन्मातृका भवन्तीति फलितार्थः। मेषादयस्तु नवभि-र्नवभिर्वर्णैर्भवन्ति। तथा हि अ क ख ग घ ङ च छ जैः केवलैर्मेष-राशिः, झ-कारमारभ्य [त (?) थ] कारान्त-नव-वर्णैः केवलैर्वृष-राशिः एवं-रीत्या कर्कटान्तं केवल-मातृका-पूर्तिः, सबिन्दुकैः अं कं खं गं घं ङं चं छं जमित्यादि नव-नव-वर्णैर्मिलि—[1]

* * * *

ति-अपूर्वोऽयमर्थः कथं विश्वसनीयः, "चत्वारि योजयेदाद्यान्" इति मूलतश्च मातृका-क्रम-पठिता ह्रस्व-दीर्घाकार-तृतीय-चतुर्थ-स्वरादय एव स्वारस्येन प्रतीयन्ते, न तु अ क ख ग-प्रभृतय इति मूल-वैरस्यं चेति दिक्।

ननु प्रतिराशि चतुर्णां वर्णानां मध्ये केषाञ्चिद् वर्णाना-मवश्यं द्वि-नक्षत्रकत्वं भविष्यतीति कथं तत्रानुकूलत्व-प्रतिकूलत्व निर्णये? तथाहि—अश्विन्यादीनां सर्वेषामपि नक्षत्राणां प्रत्येकं षष्टि-षष्टि-संख्या अंशाः कार्याः, तत्र मेषादि-राशिः सर्वोऽपि प्रत्येकं नव-नव-पादैर्नक्षत्र-सम्बन्धिभिर्भवति, नक्षत्राणि सर्वाणि प्रत्येकं चतुश्चतुः-पादानि, एकैक-पादस्य पञ्चदश-पञ्चदशांशा इति सर्व-सिद्धोऽर्थः। इत्थञ्च पञ्चविंशदुत्तरैकशतमंशा [१२५] मेषादि-राशीनां प्रत्येकं फलिताः। एकैक-राशेश्चत्वारश्चत्वारोऽकारादि-वर्णाः क्रमादाम्नाताः, इत्थञ्च [तेषां प्रत्येकं] पादोन-चतुस्त्रिंशदंशाः [३३॥०]। अश्विनी-नक्षत्र-सम्बन्धिनोऽकारस्याऽऽयाताः पादोन-चतुस्त्रिंश-दंशाः। एवं दीर्घाकारस्य। परं त्वश्विनी-सम्बन्धिन-स्तत्र सपादा रस-बाहु-मिताः [२६।०] परे पाद-द्वय-युक्ताः सप्तांशा

(1) Here one folio of the MS. is missing; the reading following is, therefore, abrupt.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

[७॥० = ३३॥०] भरण्या जाताः। इकारस्य तृतीय-स्वरस्य पादत्रय-सहितास्त्रयस्त्रिंशदंशा भरणी-सम्बन्धिनो भवन्ति। चतुर्थ-स्वरस्य शेषाः पादोन-नविन्दु-संख्या [१८॥०] अंशा भरण्यास्तिष्यंशकाः [१५ = ३३॥०] कृत्तिकाया भवन्तीति मेषराशिः पूर्णः। कृत्तिकायास्त्रिपादाधिक-त्रयस्त्रिंशदंशाः पञ्चम-स्वरस्य। शेषाः पाद-सहितैकादशांशाः [११।०] कृत्तिकायाः, द्विपाद-सहित-द्वाविंशत्यंशा [२२॥०] रोहिण्या इति सम्भूय पादोन-चतुस्त्रिंशदंशाः [३३॥०] षष्ठ-स्वरस्य। त्रिपाद-सहित-त्रयस्त्रिंशदंशा [३३॥०] रोहिणी-सम्बन्धिनः सप्तम-स्वरस्य। रोहिण्याः शेष-भूतास्त्रि-पाद-सहितास्त्रयोऽंशा [३॥०], मृगशीर्ष-नक्षत्रस्य त्रिंशदंशा [३०] इति सम्भूय त्रि-पाद-सहितास्त्रयस्त्रिंशदंशा [३३॥०] अष्टम-स्वरस्य भवन्ति। अनयैव दिशा अन्येषाम् अपि राशीनां नक्षत्रांश-कल्पनया चत्वारश्चत्वारो वर्णाः क्रमादुपपादनीयाः। इत्थं वृष-राशेर्वर्णा उक्ताः। शेषा मृगशीर्षस्य त्रिंशदंशाः [३०], पादोनाश्चत्वारोऽंशा [३॥०] आर्द्रायाः इति सम्भूय स-त्रि-पाद-त्रयस्त्रिंशदंशा [३३॥०] नवम-स्वरस्य जाताः। इत्यञ्च भरण्याः कांश्चिदंशानुपादायाश्विन्या अंशैराकार-वर्णकत्वं नक्षत्रयोर्द्वयोरुपपाद्यं, तथा चाऽऽनन्द-नामकस्य साधकस्य पाश-वीजादिक-मन्त्रस्य वा नक्षत्र-निर्णय एव न भवति, दूर एव तु तदानुकूल्यादि-विचार-चर्चा। एवमग्रेऽप्यनुपपत्तिरूह्येति चेत्, उच्यते, द्वि-नक्षत्रकत्वं केषाञ्चिद् वर्णानामगत्योपेयत एव। तदयं संग्रहः—भुजो [२] वेदो [४] रसो [६] हस्ती[८]

नवमः [८] शिव-[११] विश्वको [१३]।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

तिथि-[१५] रष्टेन्दु-[१६] रसाच्चि [२०]
द्वि-द्वि-[२२] वेद-द्वि-[२४] वाण-दृक् [२५] ॥
नागाच्चि-[२८] नन्दाच्चि-[२९] विधु-त्रि[३१] -वेद-
त्र्यं-[३४] ग-त्रि-[३६] नाग-त्रि-[३८] ख-वार्धयश्च[४०]।
चन्द्राब्धि-[४१] रामाब्धि-[४३] शराब्धि [४५] सप्ता-
म्भोध्यु न्मिता[४७] द्वि-द्वि-भका इहार्णाः ॥
चतुर्द्वि-संख्या[२४]अपरे च वर्णा-
श्चतुर्द्वि-संख्या ध्रुवमेक-भाः स्युः ॥ इति ।

आनुकूल्यं यद्यपि द्वितीय-तारात्वेन पाशादि-वर्णक-मन्त्राणां हरि-नामक-रेवती-नक्षत्रकस्य साधकस्य सम्भवति तथापि तृतीय-तारा-रूप-भरणी-सम्बन्धित्वस्यापि तत्र सत्त्वाद्धेयत्वम् एव। अत एव मूले "नवाष्ट-द्व्यधिकेतरैरि"ति विहाय "सप्त-पञ्च-तृतीय-गैरि"त्युक्तम्। उपादेयानाम् उक्तौ द्वितीयत्वेनोपादानापत्तिः, हेयानामुक्तौ तु हेयस्य तृतीयत्वादेरपि तत्र सत्त्वादनुपादानं सिध्यति, गङ्गा-जलादित्वेनोपादेयता-प्रसक्तावपि निषिद्ध-मद्यादि-सम्बन्धेन हेयतायाः सर्व-जन-सिद्धत्वात्। प्रथम-तारा यद्यपि तन्त्रान्तरेषु प्रतिषिद्धा, तथापि प्रस्तुत-तन्त्रे तदप्रतिषेधात् तदनुसारिणां षोडश-नित्या-विद्या-शोधने समुपादेयैव सेति मन्तव्यम्। ज्योतिः-शास्त्रे चु चे चो लै-रश्विन्या लि लु ले लो-वर्णैर्भरण्या अ इ उ ए-वर्णैः कृत्तिकाया इति प्रत्येक-मेकैक-पादे एकैको वर्ण इति रीत्या कृत्तिकाद्यचरान्तम् एको मेष-राशिरेवमग्रेऽपि नक्षत्रेषु वर्ण-योजना करणीयेति कथितम्। तन्त्रान्तरे अ-कारेण आ-कारेण चाश्विनी, तृतीय-स्वरेण भरणी, चतुर्थ पञ्चम-षष्ठ-स्वरैः कृत्तिकेत्यादि-रीत्या नक्षत्रेष्वक्षरयोजना, राशि-योजना त्वन्यथैव, अष्टम-नवम-दशम-स्वराणां रोहिणी-नक्षत्रकाणामपि मिथुन-राशौ योजितत्वात्। प्रस्तुते तु तन्त्र उभय-विलक्षणैव रीतिरिति ध्येयम् ॥४३॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

तन्त्रराज-टीकानुमत-नक्षत्र-चक्रम्

अ अश्विनी २३॥॰	आ अश्विनी, भरणी २६।॰ ७॥॰	इ भरणी २३॥॰	ई भरणी, कृत्तिका १८॥॰ १५
उ कृत्तिका २३॥॰	ऊ कृत्तिका, रोहिणी ११।॰ २२॥॰	ऋ रोहिणी २३॥॰	ॠ रोहिणी, मृगशिरा ३॥॰ ३॰
ऌ मृगशिरा, आर्द्रा ३॰ ३॥॰	ॡ आर्द्रा २३॥॰	ए आर्द्रा, पुनर्वसु २२॥॰ ११।॰	ऐ पुनर्वसु २३॥॰
ओ पुनर्वसु, पुष्या १५ १८॥॰	औ पुष्या २३॥॰	क पुष्या, अश्लेषा ७॥॰ २६।॰	ख अश्लेषा २३॥॰
ग मघा २३॥॰	घ मघा, पूर्वफल्गुनी २६।॰ ७॥॰	ङ पूर्वफल्गुनी २३॥॰	च पूर्वं, उत्तर १८॥॰ १५
छ उत्तरफल्गुनी २३॥॰	ज उत्तर, हस्ता ११।॰ २२॥॰	झ हस्ता २३॥॰	ञ हस्ता, चित्रा ३॥॰ ३॰
ट चित्रा, स्वाती ३॰ ३॥॰	ठ स्वाती २३॥॰	ड स्वाती, विशाखा २२॥॰ ११।॰	ढ विशाखा २३॥॰
ण विशाखा, अनुराधा १५ १८॥॰	त अनुराधा २३॥॰	थ अनुराधा, ज्येष्ठा ७॥॰ २६।॰	द ज्येष्ठा २३॥॰
ध मूला २३॥॰	न मूला, पूर्वाषाढा २६।॰ ७॥॰	प पूर्वाषाढा २३॥॰	फ पूर्वा, उत्तराषाढा १८॥॰ १५
ब उत्तराषाढा २३॥॰	भ उत्तरा, श्रवणा ११।॰ २२॥॰	म श्रवणा २३॥॰	य श्रवणा धनिष्ठा ३॥॰ ३॰
र धनिष्ठा, शतभिषा ३॰ ३॥॰	ल शतभिषा २३॥॰	व शतभिषा, पूर्वभाद्र २२॥॰ ११।॰	श पूर्वभाद्रपद २३॥॰
ष पूर्वं, उत्तरभाद्र १५ १८॥॰	स उत्तरभाद्रपद २३॥॰	ह उत्तरभाद्र, रेवती ७॥॰ २६।॰	ळ रेवती २३॥॰

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

साध्यानामपि विज्ञेयमंशकाद्यमनुग्रहे ।
यतस्ते तत्त्व-विज्ञान-रहितास्तेन चोदितम् ॥४४॥
प्राक्-प्रत्यग् दक्षिणोदक् च सूत्र-पञ्चक-योगतः ।
कोष्ठानि षोडशात्र स्युस्तेषु वर्णान् क्रमाल्लिखेत् ॥४५॥

शिक्षणीयोपासनादि-प्रकारः साध्यस्तस्य अनुग्रहे विद्योपदेशे कर्तव्येऽपि अंशकादिकम् उक्तं वक्ष्यमाणं चाऽऽकाङ्क्षणीयमेवेत्याह साध्यानामित्यादिना । एतेन ज्ञात-तत्त्व-रूपाणां सिद्धानां शिक्षितोपासनादि-प्रकारक-रूपाणां साधकानां चांशक-राशि-सिद्धादि-विचारो नानुसर्तव्य इत्युक्तं भवति । "एवं धनर्ण-शुद्धिस्तु" [६१] कार्या सर्वैस्तु सर्वतः इत्यस्याग्रे वक्ष्यमाणत्वात् सिद्धानामपि साधनीय-परम-पुरुष-भागस्य सावशेषत्वात् साधकानामर्ध-साधित-पुरुषार्थ-साधनकत्वादृक्तण-धन-चक्र- शुद्धेरावश्यकत्वेऽप्यंशकादि-शुद्धिस्तेषां नापेक्षितेतुपदेशादेतच्छुद्धिरप्राप्त-साधकता-दशावधि-समये अपेक्षितेति स्पष्टमभिहितम् । साध्यानामनुग्रहे किमर्थमंशकादि-शुद्धिरपेक्षितेत्यत्र हेतुं स्वयमेवाह—यत इत्यादिना । ते साध्यास्तत्त्व-विज्ञान-रहिताः तत्त्व-विज्ञानस्योपदेशेनापि शून्याः ॥४४॥

सिद्धादि-चक्रस्य आदि-पदेन संगृहीतस्य स्वरूप-तच्छुद्धि-प्रकारयोराकाङ्क्षायाम् आह—प्राक् इत्यादि । अत्र सूत्रत इत्युपेक्ष्य योग-पदोपादानात् परस्पर-मिश्रितत्वं रेखाणामधिगम्यते, तथा च पूर्व-पश्चिमायता दक्षिणोत्तरायताश्च परस्पर-संभिन्नाः पञ्च पञ्च रेखाः कृत्वा षोडश कोष्ठाः संपाद्याः । तेषु

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

चतुश्चतुर्विभागेन कल्पयेत्तानि वै क्रमात् ।
प्रथम-प्रथमे त्वाद्यं द्वितीय-प्रथमे तथा ॥४६॥
द्वितीयमन्यतश्चान्यत् तथाऽन्यदपि कल्पयेत् ।
तत्तत्कोष्ठेषु विलिखेत् तत्तत्-पञ्चममक्षरम् ॥४७॥

ईशानादि-कोष्ठमारभ्य क्रमेण अकारादि-क्षकारान्तान् सर्वानपि वर्णानभिलिखेत् ॥४५॥

तत्र च प्रथम-द्वितीय-तृतीयादि-क्रमतो लिखने प्राप्ते विशेषमाह—चतुरित्यादिना। तानि पूर्व-सम्पादित-कोष्ठानि। चतुश्चतुर्विभागेनेति। ईशान-तद्दक्षिण तदद्वयाधस्तन-कोष्ठ-द्वयात्मक-चतुः-कोष्ठानि कल्पयेत् एको वर्ग इति कल्पयेत्। एवमे-[वे(?)]तद्वर्ग-तत्-पंक्ति-संलग्न-कोष्ठ-द्वय-तद्द्वयाधस्तन-कोष्ठ-द्वय-रूप-कोष्ठ-चतुष्टयस्य वर्ग-संज्ञा कल्पनीया। एतयैव दिशा वर्ग-द्वयमन्यदपूरह्यमिति प्रत्येकं चतुश्चतुः-कोष्ठ-घटिताश्चत्वारो वर्गाः स्वीकरणीया इत्यर्थः। वर्गेति संज्ञा निर्मूलेति तु नाशङ्क्यम् "एवं चतुर्षु वर्गेष्वि"त्युत्तर-ग्रन्थ-दर्शनात्। लिखन-क्रममुप-दर्शयति प्रथमेत्यादिना। प्रथमस्य वर्गस्य प्रथमे कोष्ठे आद्यमकारं कल्पयेत् विन्यसेत्। द्वितीय-वर्गस्य प्रथमे कोष्ठे द्वितीयं दीर्घाकारं न्यसेत्।

अन्यतः अन्यस्मिन् तृतीय-वर्गस्य प्रथमे कोष्ठे अन्यत् तृतीय-मिकारं लिखेत् अन्यदपि चतुर्थ-वर्गस्य प्रथम-कोष्ठमपि तथा चतुर्थ-वर्णेन दीर्घेकारेण संबद्धं कल्पयेत्। इत्थं प्रकारेण वर्ग-चतुष्टयस्यापि प्रथम-कोष्ठानां पूरणमुपदिश्य तत्तद्वर्गाणां

CC-0. In Public Domain. Sri Aurobindo Ashram Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

द्वितीयादि-कोष्ठ-त्रय-पूरणोपायम् उपदिशति—तत्तदित्यादिना। तत्तत्-कोष्ठेषु तेषां वर्णाणां तेषु कोष्ठेषु द्वितीयादि-कोष्ठेषु तत्तत्-पञ्चमं तद्वर्गीय-पूर्व-कोष्ठ-लिखित-तत्तद्ह्रस्वाकारादि-रूप-वर्णमपेक्ष्य पञ्चमम् उकारादि-रूपं वर्णं लिखेत् ॥४६-४७॥

तन्त्रराज-टीकानुमत-सिद्धादि (अ-क-थ-ह)—चक्रम्

सिद्ध [पूर्व-दिक्] साध्य

अ क थ ह	उ ङ प	आ ख द ल	ऊ च फ
ओ ड व	ऌ झ म	औ ढ श	ॡ ञ य
ई घ न	ऋ ज भ	इ ग ध क्ष	ॠ छ ब
अः त स	ऐ ठ ल	अं ण ष	ए ट र

अरि सुसिद्ध

इत्येवं रीत्या चतुर्वर्गाणां षोडश-कोष्ठेषु वर्ण-लिखने कृते सान्ता अष्टचत्वारिंशद्वर्णा लिखिता भवन्ति, एकैक-कोष्ठे त्रयस्त्रयस्ते पर्यवस्यन्ति। अतः परं समुर्वरितानां त्रयाणां वर्णानां न्यासे प्राप्ते विशेष-वचनाभावात् पूर्वोक्त-दिशैव न्यासो न्याय्यः, इत्यत्र प्रथम-द्वितीय-तृतीय-वर्गाणां प्रथम-प्रथम-कोष्ठेषु ह-ल-क्षाणामुपन्यासे सिद्धे एतान्येव त्रीणि कोष्ठानि प्रत्येकं चतुरक्षराणि शेषाणि तु सर्वाणि त्रयोदश कोष्ठानि त्रि-त्र्यक्षराणीति

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

एवं चतुर्षु वर्गेषु क्षान्तावधि समालिखेत् ।
स्वनामाद्यक्षरं यत्र कोष्ठे सन्दृश्यते ततः ॥४८॥
सिद्धादीन् गणयेद् यावन्मन्त्राद्यक्षर-दर्शनम् ।
सिद्ध-सिद्धो जपात् सिध्येद् द्विगुणात् सिद्ध-साधकः ॥

वैषम्यापत्तिः, हकारादीनामनुपन्यासे केषाञ्चिल्लिखनं केषाञ्चिन्नेति वैषम्यापत्तिस्तु तदवस्था, "तेषु वर्णान् क्रमाल्लिखे-दि"त्युक्त-मूल-वैरस्यमधिकम्, इतो हि सर्व-वर्णानां लिखनस्यावगतेरित्याशङ्कां प्रथम-वैषम्यस्येष्टत्वमभिप्रेत्य निराकरोति—क्षान्तावधीत्यादिना । एतत्-फलमुपदर्शयितुं वर्ग-चतुष्टयस्य संज्ञाम् उपदिशति स्व-नामाद्येत्यादिना । यत्र कोष्ठे यद्वर्ग-घटक-कोष्ठे स्वस्य साधकस्य नाम्नः "सुप्तो जागर्ति येनासावि"त्यादि-तन्त्रान्तरोक्त-लक्षण-लक्षित-व्यावहारिक-प्रसिद्ध-संज्ञाया आद्यक्षरं प्राथमिको वर्णो लभ्यते ततस्तं वर्गमारभ्य सिद्धादीन् सिद्ध-साध्य-सुसिद्धारीन् क्रमेण गणयेत् । स्वनामाद्यक्षराक्रान्तो वर्गः सिद्धः, प्रादक्षिण्येन तद्-द्वितीयो वर्गः साध्यस्तत्-तृतीयः सुसिद्धस्तच्चतुर्थोऽरिरिति ।

मन्त्रादिमाक्षरेणैव सिद्धादि-विचारस्याऽऽदर्तव्यत्वाद् यत्र स्वनामाक्षर-घटित-वर्गाच्चतुर्थे वर्गे मन्त्रस्याद्यो वर्णस्तत्रोक्त-रीत्या सर्व-वर्ग-विचारादरणेऽपि यत्र तृतीये द्वितीये प्रथम एव वा वर्गे मन्त्राक्षरं दृश्यते तत्र नायं विचारोऽनुसरणीय इत्यभिप्रेत्याह

CC-0. In Public Domain. Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

यावदित्यादि। फलं दर्शयति सिद्ध-सिद्धवित्यादिना। एतेन सिद्ध-वर्ग एव मन्त्रादिमाक्षरस्यापि सत्त्वे सिद्ध-सिद्धे ति तन्नाम, द्वितीये मन्त्राक्षरे सिद्ध-साध्ये ति, तृतीये सिद्ध-सुसिद्धे ति, चतुर्थे सिद्धारीति संज्ञा भवतीति सूचितम्। उक्त-सिद्धादि-संज्ञाशालिनां चतुर्णामपि वर्गाणां प्रत्येकं चतुः-कोष्ठेषु गत-प्रथम-वर्णकानां मन्त्राणामपि क्रमेण संज्ञाऽनेनोपदिष्टा। यथाहि साध्य-नामा-क्षरस्य तस्मिन् वर्गे स्थित्या तस्य वर्गस्य सिद्धे ति नामेति पूर्वमुक्तं तथा तद्वर्गीय-सिद्धता-प्रयोजक-कोष्ठ एव मन्त्राद्यक्षर-सत्त्वे तस्य मन्त्रस्य सिद्ध-सिद्धेति नाम, सिद्ध-वर्गे साध्य-कोष्ठे मन्त्राक्षरे सिद्ध-साध्ये ति, सिद्ध-वर्गे सुसिद्ध-कोष्ठे मन्त्राक्षरे सिद्ध-सुसिद्धे ति, सिद्ध-वर्गे अरि-कोष्ठे मन्त्राक्षरे सिद्धारिरिति तन्मन्त्र-नाम। अथ चेत् साध्य-वर्गे मन्त्राक्षरं परन्त्वीशानादितः प्रादक्षिण्येन तद्वर्ग-कोष्ठ-गणनायां यावन्मिते सिद्ध-वर्गीय-कोष्ठे स्वनामाद्यक्षरं स्थितं तावन्मित एव कोष्ठे मन्त्राक्षरे सति तन्मन्त्रस्य साध्य-सिद्धे ति नाम, तद्द्वितीये मन्त्राक्षरे सति [साध्य] साध्येति, तत्-तृतीये मन्त्राक्षरे साध्य-सुसिद्धे ति, तच्चतुर्थे मन्त्राक्षरे साध्यारिरिति। अथ यदि सुसिद्ध-वर्गे सिद्ध-वर्ग-कोष्ठे सिद्धता-प्रयोजक-कोष्ठ-गत-संख्या-शालिनि कोष्ठ एव मन्त्राक्षरं तन्मन्त्रस्य सुसिद्ध-सिद्धे ति नाम, तद्द्वितीये मन्त्राक्षरे सुसिद्ध-साध्येति, तत्-तृतीये मन्त्रा-क्षरे सुसिद्ध-सुसिद्धे ति, तच्चतुर्थे मन्त्राद्यक्षरे सुसिद्धारिरिति। अरि-वर्गे सिद्ध-वर्ग [कोष्ठे सिद्ध] ता-प्रयोजक-कोष्ठ-संख्या-शालिनि कोष्ठ एव मन्त्राक्षरे तस्य मन्त्रस्यारि-सिद्धे ति नाम, तद्द्वितीये मन्त्राक्षरे अरि-साध्ये ति, तत्-तृतीये मन्त्राक्षरे अरि-सुसिद्धे ति, तच्चतुर्थे मन्त्राक्षरे अर्यरिरिति। यद्वा, सिद्धादि-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

सिद्धे सुसिद्धः सम्प्राप्त्या सिद्धारिर्हन्ति गोत्रजान् ।
साध्य-सिद्धोऽतिसंक्लेशात् साध्य-साध्योऽति-
दुःखकृत् ॥५०॥
साध्ये सुसिद्धो भजनात् साध्यारिः स्वां श्रियं हरेत् ।
सुसिद्ध-सिद्धोऽध्ययनात् फलं दद्याद्यथेप्सितम् ॥५१॥
सुसिद्ध-साध्यौ जापाद्यैः सिद्धये स्यादतोऽन्यथा ।
सुसिद्धे तु सुसिद्धस्तु पूर्व-जन्म-कृत-श्रमः ॥५२॥

संज्ञा कोष्ठानामेव पूर्वमुक्तेति सिद्ध-सिद्ध-सिद्ध-साध्येत्यादिकाऽर्यरि-पर्यन्ताऽपि षोडश-संज्ञा कोष्ठानामेव, मन्त्रे तु तत्तत्-संज्ञक-तत्तत्-कोष्ठ-वृत्तित्वाद् गौणः प्रयोग इत्यभिप्रेतम् । जपात् कल्पोक्त-संख्या-विशिष्ट-जपात् । द्वि-गुणात् कल्पोक्त-संख्यातो द्वि-गुणात् ॥४८-४९॥

संप्राप्त्या विधि-पूर्वकं प्राप्ति-मात्रेण, न तु जपानुष्ठान-क्लेशात् । अतिसंक्लेशात् त्रिगुण-चतुर्गुण-जपादि-कष्टानुसरणात् ॥५०॥

भजनाद् द्वि-गुण-जपादितः । अत एव द्वि-गुणादिति क्वचित् पाठः । अध्ययनात् कल्पोक्त-जप-मात्रतो न तु युग-संख्या-श्रयणमप्यपेक्षितमिति भावः ॥५१॥

जापाद्यैः जप-होम-तर्पणादिभिः । अतोऽन्यथा सुसिद्ध-साध्यादन्यः अनन्तरः सुसिद्ध-सुसिद्ध इत्यर्थ इति **मनोरमाकारः** ।

CC-0. In Public Domain. Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

तस्मात्तु सर्व-सिद्धीनां साधने[1] यो जपेन्मनुम् ।
अभिचारे रिपोरेवं यदि स्वात्म-विपत्तये ॥५३॥
सुसिद्धोऽरिरशेषेण स्व-कुलं[2] नाशयेद् ध्रुवम् ।
अरि-सिद्धः सुतं हन्यादरि-साध्यः स्व-योषितम् ॥५४

अन्यथेति द्विरावर्तनीयम्, तेन अतोऽन्यथा जप-होमादिकं विना गृहीतोऽयं सुसिद्धस्त्विति (?) तन्निर्देशस्य स्पष्टतया सुसिद्ध-साध्यानन्तर-भावीत्यर्थ-कथनस्यानुपयुक्तत्वादिति केचित् । अतोऽयं मन्त्रः पूर्व-जन्मनि कृत उपासना-रूपः श्रमो यस्येत्येवम्भूतो भवतीति ॥५२॥

तस्मात् सर्वासां सिद्धीनां सर्वासां कामनानां सिद्धये निष्पत्तये एतज्जन्मन्यकृत-जपादि-श्रमोऽपि साधको मन्त्रममुं यो जपेत् । रिपोर्नामाद्यक्षर-मन्त्राद्यक्षरयोः पूर्व-रीत्या विचारेण रिपोः सुसिद्ध-सुसिद्धो यो मन्त्रस्तेन तस्य रिपोरभिचारो यदि क्रियेत, तदा प्रत्युत स्वस्यैव विपत्तिः स्यान्न तु रिपोः । एतेन रिपोरननुकूलेन अर्यरिभूताद्य-वर्णक-मन्त्रेणैव रिपोरभिचारादि-कर्म साधनीयम्, न तु तदनुकूलेन मन्त्रेणेति ध्वनितम् ॥५३॥

अशेषेण न तु सकुल्येषु कश्चिदपि परित्यजेत् । स्वस्य स्वीय-साधकस्य योषितम् ॥५४॥

1. V. r. Comm. सिद्धये । 2. V. r. Comm. सकुल्यान् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

अरि-सुसिद्धो मन्त्रस्तु कुलोत्सादनकृच्छनैः ।
अर्यरिः स्वात्महा मन्त्रः सम्प्राप्त्यैव सुनिश्चितम् ॥५५॥
नामाद्यक्षरमारभ्य यावन्मन्त्रादि-वर्णकम् ।
त्रिधा कृत्वा स्वरैर्भिन्द्यात् तदन्यद्विपरीतकम् ॥५६॥

शनैः, न तु युगपत् । स्वस्य साधकस्याऽऽत्मानं शरीरं प्राण-वियोजन-द्वारा हन्तीत्येवं-भूतोऽर्यरि-मन्त्रः सम्प्राप्त्यैव प्राप्ति-समनन्तरमेव, न तु काल-विलम्बेन । सु सम्यग् निश्चितमिदमात्म-हननं न तु पाक्षिकम् ॥५५॥

अथ शकादय इतरत्र स्थितर्ण-धन-शुद्धि-प्रकाराकाङ्क्षायामाह— नामाद्येत्यादि । मातृका-क्रमेण साधक-प्रसिद्ध-व्यावहारिक-नाम-प्राथमिकाक्षरम् आरभ्य द्विपद-संगृहीत-स्व-ग्राह्य-मन्त्र-प्रथमाक्षर-पर्यन्तं गणयित्वा सम्पन्नामष्टाविंशत्यादि-संख्यां त्रिगुणां कृत्वा सम्पन्नां चतुरशीत्यादि-रूपां संख्यां स्वरैः सप्तभिर्विभज्य लब्धः शिष्टाङ्कः सप्तादि-रूप एव । न चेह तन्त्रे शून्यस्य फलम् उक्तम्, नापि तन्त्रान्तरम् उपादेयं तन्त्रान्तर-नैरपेक्ष्य-रूपस्य पूर्णत्वस्य पूर्वम् उक्तस्य व्याकोप-प्रसक्तेः । तस्माच्छिष्टेन सप्ताङ्केनैवैतत्-तन्त्रोक्त-विद्यानामृण-धन-विचारो न शून्याङ्केन, तथाच सप्तादि-रूपोऽङ्को नाम-राशिः । एवं मन्त्र-प्राथमिकाक्षरमारभ्य साधक-नाम-प्राथमिकाक्षर-पर्यन्तं गणयित्वा सम्पन्नां पञ्चविंशत्यादि-संख्यां त्रि-गुणां कृत्वा सम्पन्नां पञ्चसप्തत्यादि-संख्यां सप्तभिर्विभज्य शेषाङ्कः पञ्चादि-रूपो मन्त्रराशिः । तदेतन्मन्त्र-राशि-करणं "तदन्यद्विपरीतकम्" इत्यनेनोक्तम् । ततो

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

नाम-राशि-करणादन्यद् मन्त्र-राशि-करणं विपरीतकं साधक-नामादि-[वर्ण-मन्त्र (?)] वर्णान्तं यत् पूर्व-गणनमाम्नातं ततो विपरीतं मन्त्र-राशि-करणे गणनमाश्रयणीयम्, मन्त्रादि-वर्णमपेक्ष्य साधक-नामाद्यक्षर-पर्यन्तं गणयेदिति यावत्। यदुक्तं तन्त्रान्तरे

"नामाद्यक्षरमारभ्य यावन्मन्त्रादिमाक्षरम्।
गणयेन्मातृका-वर्ण-क्रमेण गुणयेत् त्रिभिः।
विभक्ते सप्तभिः शिष्टो नाम-राशिरुदाहृतः।
एवं मन्त्राणं मारभ्य यावन्नामादिमाक्षरम्।
गणयित्वा त्रिभिर्हत्वा विभक्ते सप्तभिर्बुधैः।
मन्त्र-राशिः स्मृतः———॥"

इति। **पदार्थादर्श-मन्त्र-महोदधि**कृतोरप्यत्रै वार्थे निर्भरः। ननु तन्त्रान्तर-सापेक्षत्वे स्वतन्त्रत्वाद्यनुपपत्तिः स्यात्? न स्यात्, नहि वयं तन्त्रान्तर-सापेक्षत्वमस्य स्वीकुर्मः, अपि तु "विपरीत"-मितयस्य सन्दिग्धार्थस्य तन्त्रान्तरेणार्थं विनिश्चिनुमः। ननु सर्वांश-वैपरीत्यमविशेषादिहाश्रयणीयं, तथा च मन्त्र-राशि-करणे पूर्वोक्त-रीत्या आरम्भावधि-समाप्त्यवध्योर्वैपरीत्यमिव गुणक-भाजकयोरपि वैपरीत्यमत्राश्रयणीयं, तथा च सप्तभिर्गुणयित्वा त्रिभिर्विभागः स्वीकरणीयः; अत एव **मनोरमायां** "मन्त्राद्यक्षर-मारभ्य स्व-नामाद्यक्षरावधि मातृकाक्षराणि विपरीतकं सप्तभिः संवर्ध्य त्रिभिराहरेदिती"ति। अत्र सप्तभिः संवर्ध्येत्यस्य पूर्वोक्त-मातृका-संख्यायां सप्त-संख्याऽधिका योजनीयेत्यर्थो यद्यप्यवगम्यते तथापि "मन्त्राद्यक्षरादि-नामाद्यक्षरान्तानि मातृकाक्षराणि गणयित्वा सप्त-गुणीकृत्य त्रिभिर्भक्त्वा शेषमेकतः स्थाप्यं स मन्त्र-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

क्लत्वाऽधिको[1] ऋणी ज्ञेयो[2] ऋणी चेन्मन्त्रमुत्तमम् ।
स्वयम् ऋणी चेत्तन्मन्त्रं त्यजेत् पूर्वं ऋणी यतः ॥५७

राशिरि"ति निधिकृता स्पष्टं लिखितत्वान्मनोरमा-ग्रन्थोऽपि यथा-कथञ्चित् सप्त-गुण-परत्वेनैव योजनीय इति चेत्, मैवं ; एवं तर्हि मातृका-क्रमेण गणनायां नाम-राशि-करणे समाश्रितायामपि वैपरीत्यें किन्न रोचयेत् ? सर्वांश-वैपरीत्यस्य तत्रैव सम्भवात् । इत्थञ्च कमलापत्यादि-नामवत्-साधकस्य नाम-राशि-करणे कादि-रूप-नामादि-वर्णतो हादि-विद्याद्यक्षरस्य रामाग्नि-[३३] संख्यत्वं भवति, मन्त्र-राशि-करणे हकारतः ककारस्य मातृका-गणन-क्रमेण विंशति-संख्यत्वमायाति, वैपरीत्येन गणने तु रामाग्नि-संख्यत्वं पुनरायातीति महदेव फल-वैषम्यम् । नवा त्वया परैर्वापि वैपरीत्येन मातृका-गणनमुक्तं तन्त्रान्तराच्च पूर्वमुदाहृतम्, उभयत्रापि राशौ मातृकार्ण-क्रमत एव गणनं स्पष्टमधि-गम्यते। अविरोधेनैव समुपपत्तौ विरोध-कल्पनस्यानाय्यत्वा-दिति मन्तव्यम् ॥५६॥

नाम-राशि-मन्त्र-राशि-करणस्य फलमाह क्लत्वेत्यादिना । पूर्वान्वितं क्लत्वेति पदम् । अधिकः अधिकाङ्क-शेषको मन्त्रः साधको वा ऋणी न्यूनाङ्क-शेषकस्य मन्त्रस्य साधकस्य वा ऋणवान् । अपरो धनी ज्ञेय इत्यार्थिकम् । इत्थम् ऋणि-धनि-ज्ञानेऽपि चोपादेयत्वानुपादेयत्वे मन्त्रस्य कथमवगम्ये इत्यत्राह ऋणी चेदित्यादि । स्वयं साधकश्चेन्मन्त्रीयर्णवांस्तदा तन्मन्त्रं स्वनिष्ठाया ऋणिताया निरूपकं मन्त्रं साधकस्त्यजेत् । त्यागे

1-2. The okāras should be omitted.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

कथम् ऋणित्वं मन्त्राणां साधकानां च मे वद ।
पूर्व-जन्म-कृताभ्यासी पापादस्याफलामिकृत् ॥५८॥

हेतुमाह पूर्वं इत्यादिना । पूर्वं उपासनां विनापि पूर्व-जन्मनि स्वोपासना-फलस्य दत्ततया पुनः साम्प्रतं फलं न दास्यतीत्यतो नायमुपादेयः । एतदुपासनायां हि कृतायां पूर्व-प्राप्तं यत् फलं तदेव यदृणं तस्य प्रतीकार-मात्रं भविष्यति । तथा च पूर्वस्यर्णस्य प्रतीकार-करणार्थमुपादीयतां नाम, फल-लाभ-प्रत्याशया तु नोपादीयताम्, यतो न ततः फलान्तर-लाभ इति भावः ॥५७॥

ननूत्तमर्णत्वाधमर्णत्वयोर्धन-दानोपादान-प्रयुक्तयोः परस्परं पुरुषयोरिव सम्भवात् साधक-मन्त्रयोः कथं तथात्वं सम्भवदुक्तिकं स्यादित्यभिप्रेत्य देवी पृच्छति—कथमित्यादिना । अतिरहस्यत्वेन यतस्ततो गोप्यत्वेऽपि

"रहस्य-धारिणी यस्माद् यस्माद्भक्ति-विधायिनी ।
यस्मात् प्रियासि भक्तासि ततस्ते कथयाम्यहम् ॥"

इत्यादि-तन्त्रान्तरतो रहस्यार्थ-निक्षेप-योग्यत्वेन वर्णिताया मम निकटे त्ववश्यं प्रकाश्यमेवेद रहस्यम् इत्यभिप्रेत्योक्तं मे इति । श्रोष्यिव आशङ्कितार्थ-निराचिकीर्षयाह पूर्वेत्यादि । पूर्व-जन्मनि कृतोऽभ्यासो जप-होम-पूजादि-कर्मणां पुनः पुनरावर्तनं यत्रेति बहुव्रीहिः । यद्यप्यद्भुत-सामर्थ्यानाम् अत्र निरूप्य-नित्यादि-विद्यानां सद्य एवोपासनानन्तरं फलदायकत्वं, तथापि सति प्रतिबन्धके साधक-सहस्रमप्यकिञ्चित्करमिति पाप-रूप-प्रतिबन्धक-सत्त्वेन तत्र फलानुत्पादः ॥५८॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

पापे नष्टं फलावाप्तिः काले देह-क्षयादृणी ।
मन्त्रः सम्प्राप्ति-मात्रेण प्राक्तनः सिद्धये भवेत् ॥५९॥
सिद्ध-मन्त्रात् गुरोर्लब्ध-मन्त्रो यः सिद्धिभाङ्नरः ।
लक्ष्मीमदादनादृत्य मन्त्रे[1] भोगमवाप्तवान् ॥६०॥
सन्मन्त्रस्य[2] ऋणी ज्ञेयो भजन तस्य पूर्वगम् ।
तस्मादृण-विशुद्धिस्तु[3] कार्या सर्वैस्तु सर्वतः[4] ॥६१॥

ननु प्रतिबन्धक-नाशोऽपि कुतो नैतदुपासनातो जात इति चेत् सत्यं, कारण-पदार्थ-करणं प्रतिबन्ध-ध्वंस-करणञ्चेति द्वयं यत्र कार्ये निष्पादनीये [कर्तुं ? कर्तुः] पतति तत् कार्यम् असाध्यमसाध्यकल्पं वा भविष्यतीति तत्र त्रि-गुण-चतुर्गुण-पञ्च-गुणादि-सेवनमपेक्षितमिति । तावत् सेवा काल-विलम्बेन जाता प्रतिबन्धकं नाशयित्वा फलं दातुं यावदुद्युक्ता ताव-दायुर्नाशाद्देहस्यैव नाशो जात इति सोपासना द्वितीय-जन्मनि सद्यः फलं दास्यति, प्रतिबन्धकाभाव-कारणयोः पूर्वमेव निष्पा-दितत्वात् । यस्य चोपासनैवम्भूता स एव मन्त्र ऋणीत्युच्यते । ऋणम् अदत्त-फलकोपासना, कर्मता-सम्बन्धेन तद्वत्त्वं च मन्त्रे इत्येवं सर्वमभिप्रेत्याह पापे नष्टे इत्यादि ॥५८॥

मन्त्रस्य ऋणितामुपपाद्य साधकस्य कथमृणित्वमुपपद्येतेति—

---

1. V. r. Comm. मन्त्रम् । 2. V. r. Comm. स मन्त्रस्य ।
3. V. r. Comm. एवं धनर्णा-शुद्धिस्तु ।
4. V. r. Comm. सर्वशः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

देवी-प्रश्नस्योत्तरमुपदर्शयति सिद्ध-मन्त्रादित्यादिना। प्राप्त-लक्ष्मी-प्रभवादहङ्कारात् स्वयं गृहीतमपि मन्त्रम् अनादृत्य अनुपास्य यो हि साधको भोगमुपासना-फलं भोगं प्राप्तवान् सोऽयमुपासको मन्त्रस्य ऋणीतुच्यते। स्वफल-समानाधिकरणोपासना-विरह एव साधक-गतोऽत्तर्णम्, आश्रयता-सम्बन्धेन तद्वांस्तथा। नन्नू-पासना-रूप-कारणं विना कथमुपासना-फलं भोगं साधकः प्राप्नुयात्, नहि कार्यं कारणमन्तरेण क्वापि चोत्पाद्यं भवतीत्यत्राह—सिद्ध-मन्त्रादिति। तथा च स्वाश्रय-[दीक्षणत्व ? दीक्षकत्व]-सम्बन्धेन शिष्य-गता गुरु-कृतोपासनैव तादृश-फलं जनयतीति नोक्त-दोषः। तस्य अनुपासितत्वेऽपि दत्त-फलकस्य मन्त्रस्य, भजनम् उपासनं पूर्वगं गुरु-गतम्। यद्वा पूर्वगं ततोऽपि पूर्व-जन्म-गतं तज्जन्मन्यसेवनेऽपि ततः पूर्व-जन्म-कृत-श्रमादेव लक्ष्मी-लाभान्नेतो जन्मतोऽव्यवहित-पूर्व-जन्मनि कृता सेवेति। गुरोः सिद्ध-मन्त्रत्वन्तु सर्वत्राप्युपदेश आवश्यकम् अन्यथा दानादानयोर्द्वयोरपि प्रतिषेधात्। "पूर्वकमि"ति पाठे अभजनम् इत्यकार-प्रश्लेषः, तस्य साधकस्य पूर्वकं पूर्वम् अभजनम् उपासनाभावो यतोऽस्ति ततोऽसौ साधको मन्त्रस्य ऋणी भवतीति पर्यवसितार्थः।

ननु "साध्यानामपि विज्ञेयमि"त्यनेन यथाऽंशकादिकं साध्यानामेव शोध्यत्वेन दर्शितं न साधक-सिद्धयोस्तथा "अंशकादय" इत्येतद्वाक्यस्यादि-पद-ग्राह्यऋण-धन-शोधनमपि साध्य-विषयमेव भविष्यतीति प्राप्ते विशेषमाह—एवमित्यादिना। एवं पूर्वोक्त-प्रकारेण दर्शिता ऋण-धन-चक्र-शुद्धिः सर्वैः साध्यैः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

रुद्राक्षैरपि पद्माक्षैः पुत्रजीवैः कु-चन्दनैः ।
स्फाटिकैश्च प्रवालैश्च मौक्तिकैर्हैम-निर्मितैः ॥६२॥
राजतैर्वाऽक्ष-माला[1] स्यात् पूर्वं पूर्वं फलेद् गुरुः ।
आदि-क्षान्तैरक्षरैः स्यादक्ष-माला यथार्थतः ॥६३॥

साधकैः सिद्धैश्च सर्वशः (?) सर्वेषु मन्त्रेषु सर्वासु विद्यासु चानुसरणीया। तुनाऽथकादि-(शुद्धि-ऋण ?) विशुद्धिः साध्य-विषयैवेति ध्वनितम्। कुलाकुलादि-शुद्धिरपि चावश्यमत्रापेक्षिता "नराणामिव मन्त्राणामि"त्यादिना मूल एव भूत-वैर-सात्त्विकत्वादि-गुण-वैरादिना वर्णानां वैरसप्राग्रे वक्ष्यमाणतया स्वनामादि-वर्ण-वैरीभूत-प्रथम-वर्णको मन्त्रो नोपादेय इत्यर्थस्यार्थायातत्वादिति ध्येयम्। अत्र "नाम" जन्मर्क्षाक्षर-सम्बद्धमुपादेयम्, तथा सङ्केताभावे तु तदेकाक्षरानुकूल्य-मात्रं विचार्यम्। नात्र "सुप्तो जागर्ती"त्यादि-तन्त्रान्तरापेक्षा, नवा वकार-लकार-द्वय-भेद-बोधक-तदपेक्षा। सर्वथा तदज्ञान-स्थले त्वगत्या "सुप्तवि-"त्यादि-प्रसरः क्वाचित्कः। विशदीभविष्यति चेदं सुदर्शन-सहोदर-कमलाविपद्धते (?) नित्य-खण्डतः ॥६०-६१॥

पूर्वोक्तोपासनाया लक्षादि-संख्या-विशिष्ट-जपादि-घटिताया गणनां विनाऽनुपपत्त्या तत्-साधनं यत् किञ्चिद् वस्तु समाक्षिपतीति स्वेच्छयोपादाने प्रसक्ते नियम-विधिमाह—रुद्राक्षैरित्यादिना। कु-चन्दनै रक्त-चन्दनैः ॥६२॥

किमेषां रुद्राक्षादि-नव-मालानां समुच्चयो विकल्पो मुख्यानु-

---

1. For this reading, cf. the Text quoted by the commentator, p. 54, l. 9

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon
CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

अनुलोम-विलोमाभ्यां मातृकान्तरितं जपेत् ।
एवं सर्व-गुणोपेतो जायते सर्व-सिद्धिमान् ॥६४॥

कल्प-भावो वेत्याकाङ्क्षायामाह—पूर्वं पूर्वमिति । तथा च तृतीय एव पक्षोऽनुमत इत्युक्तं भवति । अत्र मणि-संख्या तन्त्रान्तरवन्न कामना-भेद-भिन्ना, प्रस्तुत-तन्त्रेऽनभिधानात्, किन्तु जपस्य शत-संख्यया कर्तव्यत्वात्तावत्-संख्या एव मणयः । अत एव वर्णमालां तावत्-संख्यैरेवाक्षर-मणिभिर्वक्ष्यति मूले । वर्ण-माला वा जपायोपयोजनीयेत्याह—आदीत्यादि । पूर्वमुक्तासु जप-मालासु “राजतैर्वाऽक्ष-माले”त्यनेन यदक्ष-माला-पदं प्रयुक्तमासीत् तत् केवलं रूढि-मात्रेण, साम्प्रतमुक्ताया वर्ण-मालायास्तु यथार्थत्वम् अन्वर्थकत्वमेव, अकार-क्षकारयोः पूर्वापरभागयोर्मणि-रूपत्वात् ॥६३॥

ननु मातृकाणामल्प-संख्यत्वाच्छत-संख्य-जपः कथं ताभिर्निर्वाहयितुं शक्य इत्याकाङ्क्षायामाह—अनुलोमेत्यादि । अन्तरितमिति । पूर्वमनुलोम-क्रमेण मातृकाया एकैको वर्णस्ततः स्व-स्व-जप्य मन्त्रस्ततः प्रतिलोम-क्रमेणैकैको वर्ण इति क्रमेण जपे क्रियमाणे मातृकान्तरितं यथा स्यात्तथा जपः सम्पन्न एव । एतज्जपस्य फल-विशेष-प्रदर्शन-मुखेन कामुकानामवश्य-कर्तव्यतां दर्शयति—एवमित्यादिना । एवमित्यत्र जप इति शेषः । एवं जपः उक्त-रीत्या मातृकान्तरित-मन्त्र-जपः । गुणाश्च—कर-भ्रष्टत्व-दुर्मिल-मणि-स्फोटन-समल-तर्जनी-स्पृष्टत्व-पर-प्रेक्षितत्वाशुचि-स्पृष्टत्वासंस्कृतत्वादि-दोष-शून्यत्वम् एव । सिद्धिमान् सकल-कामनोपयोगि-मन्त्र-सिद्धिकरः ॥६४॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

तर्जनी-रहितैः कुर्यादङ्गुल्यग्रै र्जप-क्रियाम् ।
अङ्गुली-पर्व-संस्पर्शादपि वा गणयेज्जपम् ॥६५॥
अबुद्धि-पूर्वं विहिते निषिद्धे कर्मणि द्रुतम् ।
विद्यां जपेच्छतं तेन तत्-पापान्मुच्यते ध्रुवम् ॥६६॥
नित्यातिक्रम-दोषाणां शान्त्यै विद्यां[1] शतं जपेत् ।
नैमित्तिकातिक्रमणे सहस्रं प्रजपेत्तदा ॥६७॥
विशुद्ध-देह-वदनः शुक्लाम्बर-धरः शुचिः ।
विमुखः पर-निन्दासु देवतादर्शनेषु च ॥६८॥
परार्थ-वनिता-भूमि-पीडासु विगत-स्पृहः ।
दयान्वितः सर्व-जने प्रेक्षाकारी गत-स्पृहः ॥६९॥

पूर्वोक्त-मालानां स्थापन-स्थानम् आह—तर्जनीत्यादिना । तर्जनी-व्यतिरिक्ताङ्गुल्यग्रेषु मालां निधायाङ्गुष्ठाग्रेण चालयेदिति भावः । पर्व-मालामाह अङ्गुलीत्यादिना । अनामा-मध्य-पर्वारभ्य तर्जनी-मूल-पर्वान्तं गणयित्वा दश-संख्या-पूर्तिः । एवमभ्यासे शतादि-संख्यापि शक्यते निष्पादयितुम् ॥६५॥

ननु तर्जन्यग्रे जपादि-करणे किं प्रस्तुतं जप-फलमात्रं नोत्पद्यते आहोस्वित् प्रत्यवायोऽप्यधिक इति शङ्कां द्वितीय-पद्यमभ्यु[2]—

* * * *

---

1. V. r. Comm. मूलं ।
2. Two folios of the ms. missing here.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

आस्तिको गुरु-भक्तश्च नित्यशो नियमान्वितः ।
यः स सर्व-गुणोपेतो विद्या-सिद्धिमवाप्नुयात् ॥७०॥
अन्यथा वर्तमानो यो विद्या-भजनवाँश्चिरम् ।
न तस्य सिद्धिः कुत्रापि कदाचिच्च कथञ्चन ॥७१॥
आदौ योगो भवेदन्ते पल्लवः सम्पुटो द्वयोः ।
एकान्तरं तु ग्रथनं विदर्भो द्व्यन्तरीकृतः ॥७२॥
मन्त्र-दोषांस्तु विज्ञाय गुरुः परिहरेत् क्षणात् ।
अन्यथा स गुरुः शिष्यं निहन्त्येवाचिराद्ध्रुवम् ॥७३॥
तेन तत्-परिहारञ्च शृणु देवि समाहिता ।
परिहार-प्रकारन्तु वक्ष्ये योगेषु तत्त्वतः ॥७४॥
दग्धः षट्-कर्णगो मन्त्रस्त्रस्तः स्यादधिकैर्जपात् ।
गर्वितस्त्वविधि-प्राप्तः शत्रवो वैरि-कोष्ठगाः ॥७५॥
बाला लघ्वक्षर-प्राया वृद्धा गुर्वक्षरान्विताः ।
निर्जिताः कर्म-बाहुल्यादहसाः सत्त्व-वर्जिताः ॥७६॥

पुनः पुनः प्रवर्तनान्निर्जिता (७) मन्त्रा भवन्ति । यथा हि निर्जिता गत प्रतापाः पुनः पराक्रमं कर्तुं न प्रभवन्ति, तथा एक-द्व्यादिका-वृत्त्या दत्त-फला मन्त्राः पुनः फलं दातुं न प्रभवन्तीति निर्जित-नामकत्वम् । अनवरतं काम्य-कर्मसु नियोजनात्तु कुण्ठत्वमिति न तेन पौनरुक्त्यं, नहि नित्य-योजन-बहुल-योजनयोर्न भेदः ।

यत्तु कर्म-बाहुल्यात् साधकस्य दुष्कर्म-क्षपण-पर्याप्ताराधना-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

अपूर्ण-रूपाश्छिन्नाः स्युः स्तम्भिताः सानुनासिकाः ।
अकाल-विनियोगेन मूर्च्छिताः स्वापगा जपात् ॥७७॥

भावाद् दुष्कर्मणामवशिष्टतया तद्बलेन फलादानान्निर्जिताः पराजिता इति । एतत्-स्वरूपावगमस्तु यावज्जीवं यथाविधि कृतेऽप्याराधने फलानधिगमने सति संभवति, एवमवगमे स्वकर्मण्येव दुष्कृत-रूपे द्वेषः स्यान्न मन्त्रे इति सफलोऽवगम इति **निधिकृतोक्तं** तन्न युक्तम्, एवमपि हेयोपादेयतयोस्तत्र मन्त्रे कर्तुमशक्यत्वेन "तान् परिहरेत्" इत्यादिनोक्त-परिहारक-मन्त्रान्तर्गणनायामस्यानुपपत्तेः । अस्मन्मते च पुनः पुनः काम्य-कर्मणि योजनेन निर्जिता ये मन्त्रा जाता इति ज्ञानाद् वक्ष्यमाणं तत्-परिहार-प्रकारं करिष्यति मन्त्रमिमं त्यक्त्वा मन्त्रान्तरं वाऽनुसरिष्यतीति किमनुपपन्नम् । अहसा (८) हकार-सकाराभ्यां जीव-भूताभ्यां हीनाः सत्त्व-वर्जित-पदेनाभिधीयन्ते, न हि जीव-हीनस्य बलवत्त्वं सम्भावितमपि ॥७६॥

अपूर्ण-रूपा इति न विद्यते पूर्णं रूपं वर्णानुपूर्वी-विशेषो येषाम् इति, स्व-वाच्य-देवतायां शक्ति-प्रतिपादक-वर्ण-शून्या इति यावत् । **मनोरमाकृतस्तु** अपूर्ण-रूपाः स्व-वाच्य-देवतायाः पौष्कल्येन वाचका वर्णा यत्र न पतिताः स मन्त्रश्छिन्नः (८), महावयविनः पौष्कल्येन प्रस्तुत-देवता-वाचकस्यावयवत्वादस्येत्याहुः । **निधिकृतस्तु** नैवं युक्तं, खण्डीभूता इत्यनेन गतार्थत्वादित्याहुः । खण्डित-लक्षणे पूर्ण-रूपस्यैव मन्त्रस्य साधकेनैक-देश-जप-कार-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

स्यात् साधकापराध-कृतो मन्त्रे दोषः, छिन्ने तावदर्थ-वाचक-वर्णा-भाव-कृत एव दोष इति न गतार्थत्व-शङ्केति-तु मम प्रतिभाति।

सानुनासिकाः कादि-पञ्च-वर्गीय-पञ्चमाक्षरान्यतम-बहुलाः, स्तम्भितवदभिमतार्थ-करणासमर्थतया स्तम्भित-(१०) पदेनाभि-धीयन्ते। अकाल-विनियोगेनेति। दीक्षा-काले यदि दीक्षा न कृता किन्त्वनुक्त-काले, सन्ध्यादि-नित्य-नैमित्तिकानां वक्ष्यमाणातिरिक्त-कालेऽनुष्ठाने अरि-निग्रहादि-काम्येषु च रिपु-जन्म-लग्नाष्टम-लग्नादि-रूप-विहितोत्तर-कालेऽनुष्ठाने सति स मन्त्रो मूर्छित-वदकार्य-करत्वे न मूर्छित-(११) नामतामवलम्बते।

मनोरमाकृतस्तु साधकस्य श्वासे दक्षिण-नासा-पुटे परिपूर्णे वहति सति आग्नेय-मन्त्राणां प्रबोध-कालः इतरेषां स्वाप-कालः, प्रणव-क्षकार-रेफ-हकाराक्षर-प्राया मन्त्रा आग्नेयाः। वाम-नासा-पुटे श्वासे प्रवहति सति सौम्य-मन्त्राणां प्रबोध-कालः आग्नेया-दीनां स्वाप-कालः। एतत्-सकलमविज्ञाय मन्त्राणां वैपरीत्येन विनियोजकः साधको मूर्छाकर इति मन्त्रा मूर्छिता इव साधक-समीहित-करणे निर्व्यापारा भवन्तीति वदन्ति। तदेतन्मतं निधिकृतो नानुमन्यन्ते, पूर्वोक्त-रीत्या स्वाप-कालस्य तन्त्रान्त-रोक्तत्वे न सप्रमाणत्वेऽपि प्रस्तुत-तन्त्रानुक्तस्य प्रस्तुत-तन्त्रे ग्रहणे प्रस्तुत-तन्त्रे स्वान्य-तन्त्रानपेक्षत्व-रूप-पूर्णत्वस्य भगवतैव पूर्वमुप-दिष्टस्य व्याकोपापत्तेः। यथोद्दिष्ट-जपाभाववतामेव मन्त्राणामग्रे सुप्तत्वाभिधानात्, तन्त्रान्तरोक्त-स्वापस्य प्रकृते ग्रहीतुमनुचित-त्वाच्च। प्राणोदयस्य साधक-शरीर-निष्ठतया प्रबोध-स्वापयोश्च मन्त्र-निष्ठतया वैयधिकरण्याच्चेति, तन्त्रान्तरीय-प्रबोध-स्वाप-निर्णयस्य निरुपपत्तिकत्वाच्चेति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

अत्र वदन्ति, दक्षिण-नासा-पुटावच्छिन्न प्रवहणक-पवन-कालावच्छिन्न-जपकालस्याग्नेयादि-मन्त्र-निष्ठस्य प्रबुद्धत्वस्य वैयधिकरण्यासम्भवात्, अपह्नोतुमशक्यत्वात् (?)। न च भगवतैव प्रणीतानां तन्त्रान्तराणां निरुपपत्तिकत्वं मनसापि शक्यं वक्तुम्। किञ्च, स्वापगा इत्यनेन हि जपाभाव-विशिष्टानां मन्त्राणां स्वापग-पुरुषवत् साधक-कार्याक्षमतया स्वापगेति संज्ञा-मात्रं कृतं न तु मन्त्राणां स्वाप-काल (उपदेश-कालमेवारभ्य ?) यथोक्त-विधिना निरूपित इति सर्वथाऽनुक्तांशे तन्त्रान्तर-ग्रहणे का नो हानिः। न हि अकाल-विनियोगेनेत्यत्राकाल-पदेन स्वाप-काल-मात्रमुपादीयते येन तन्त्रान्तरापेक्षा-नियमः स्यात्, किन्तु प्रकृत-तन्त्र-तन्त्रान्तर-धर्म-शास्त्र-ज्योतिः-शास्त्रादिषु ये ये काला यस्य यस्य प्रतिषेधितास्ते सर्वेऽप्यत्राकाल-पदेनोपादीयन्त इति किमनुपपन्नम्।

अकाल-विनियोगेनेति—जपादित्यत्राप्यनुसज्जते। कालो हि जपस्योपदेश-कालाव्यवहितोत्तरः सर्वोऽपि भगवता विनियुक्तस्तमनवलम्ब्य जपो ह्यकाल-विनियोग-विशिष्ट-जपस्तत्-कर्म-भूता मन्त्राः स्वापग-(१२) पद-वाच्याः। टीकाकृतस्तु "अजपादिति पदच्छेदः, सन्धिस्तु दिव्यत्वात् कथंतादि-शङ्काया न विषयः, उपदेश-कालमारभ्य जपाननुष्ठानं चेहाजप-पदार्थः" इत्याहुः। निधिकृतोऽप्येवम्। अन्ये तु, स्वापगेत्याबन्तं प्रथमैक-वचनान्तं, तन्त्रे च विद्येति विशेष्य-पदमध्याहार्यम्। अत्र प्रकरणे मन्त्र-पदं मनन-कर्तृ-त्राण-कर्तृत्वोपाधिना विद्या-साधारणमिति ध्वनयितुम् उपक्रान्त-मन्त्र-पद-त्यागेन विद्या-पदम् उपात्तमिति, वदन्ति ॥७७॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

मत्ताः पत्रेषु पठनादन्य-वर्णैस्तु कीलिताः ।
रुद्धा विसन्धिकाः प्राप्त-दुःखा वैरि-समन्विताः ॥
खण्डीभूतास्त्वंश-जापादङ्ग[1]-हीनास्त्वसंवृताः ।
अपूर्णेनोपदिष्टा ये क्षीण-वीर्यास्तु ते मताः ॥७९॥

पत्रेषु पठनादुक्त-विधिना नाथोपदेशमन्तरेण पुस्तक-दर्शन-पाठ-मात्रेण जप्यमाना मन्त्रा मत्ता इवार्थापेक्षि-साधकस्यानर्थकराः मत्त-(१३)पदेनाभिधीयन्ते । अन्य-वर्णैः तन्त्र-प्रोक्ताक्षर-भिन्नाक्षरैर्युता इति शेषः । यथाहि लोकोपद्रव-कारकं भूतादिकं तन्मन्त्रविदा लोहादि-कीलेन पाषाण-वृक्षादिषु कीलितं सत् स्वाभिमत-लोकोपसर्गादि-रूप-स्वकार्याक्षमं भवति, तथा मन्त्रोऽपि प्रस्तुत-मन्त्रोद्धारक-भगवद्वचनानारूढ-वर्ण-मिश्रितः स्वकार्य-साधक-समीहित-करणे क्षमो न भवतीति कीलित-(१४) संज्ञाऽस्य मन्त्रस्य । वर्णान्तर-योजनञ्च भ्रमेण, प्रणव-श्री-वीज-काम-वीज-माया-वीजानि प्रशस्ततराणि सर्वत्र योज्यानीति भ्रान्तस्य वा सम्भवति । विसन्धिका व्याकरणोक्त-गुणादि-सन्धि-प्राप्तावप्यकृत-सन्धयो रुद्ध-(१५) पदेनोच्यन्ते । वैरि-समन्विताः पुं-स्त्री-दैवत-मन्त्रयोः, क्रूर-सौम्य-मन्त्रयोस्त्वरिता-नृसिंहादि-मन्त्रयोश्च वक्ष्यमाण-वैरकयोः सहोपासना-कर्म-भूताः प्राप्त-दुःख-(१६) पदेनाभिलप्याः । प्रसिद्धमेव हि वैरिणामेकत्र वासे दुःखित्वमिति ॥७८॥

अंशस्य मन्त्रैक-देशस्य जपान्मन्त्रः खण्डित-(१७) नामाऽभि-

1. V. r. Comm. जपादङ्ग ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

सदा प्रयोगात् कुण्ठत्वं क्लिष्टताऽतिविलम्बनात् ।
रुग्णाः प्रलपनैर्जापादन्य-मन्त्रैः सहाऽऽविलाः ॥८०

मतः । ध्रस्वादिना ह्रुत-प्लुत-दीर्घवत् खण्डिताः । यथा गुरूपदिष्ट-सप्रासाद-पञ्चाक्षर-मन्त्रादौ स्व-बुद्ध्या शास्त्रीय-भिन्न-मन्त्रत्वम् अङ्गीकृत्यान्यतर-जपे द्वयोरपि खण्डितत्वं दोषस्तथेति । अङ्ग-हीना इत्यावर्तनीयम्, अनावृत्तौ त्वेकमेव पदं लक्ष्यं लक्षणं च कथमभिदध्यात्? तथा च षडङ्गादि-न्यास-मन्त्रा येषां नोप-दिष्टास्ते मन्त्राश्चक्षुरादिकाङ्ग-हीनवत् साधक-कार्याक्षमतया अङ्गहीन-(१८) पदेनाभिधीयन्ते । असंवृता इत्यप्यावर्तनीयमुक्त-युक्तेरत्राप्यनुवृत्तेः । न "चाङ्ग-हीनास्त्वसंवृता" इति द्वाभ्यामेकमेव दोष-लक्षणमभिधीयते इति वाच्यम्, दोष-गत-वक्ष्यमाण-मौल-संख्या-व्याघातापत्तेः । अयोग्यानुपदेश-रूपं यद् गोपनं तदभाव-वन्तो मन्त्रा असंवृत-(१९) पदेन कथ्यन्ते । असम्यक्त्वमपि

"असम्यक्त्वं तु मन्त्राणामयोग्य-कथनाद् भवेत्"[३५।७०]
इत्यनेनैव वक्ष्यमाणमसंवृतत्वापर-पर्यायमेव ।

अपूर्णेन वक्ष्यमाण-प्रकारक-पूर्णाभिषेकाख्य-संस्कार-विशिष्टत्वे सति लब्धोपदेश-करण-विषयक-गुर्वनुज्ञो यस्तदतिरिक्तेन देशिकेन उपादिष्टा मन्त्राः क्षीण-वीर्य-(२०) नामका भवन्ति ॥७९॥

सदा-प्रयोगादिति व्याख्यातम् (२१)। अतिविलम्बनात् सर्व-साधारणाधिक-कालेनाऽऽवर्तनात् क्लिष्टता मन्त्राणां भवति-इत्यतिविलम्बावर्तिता मन्त्राः क्लिष्ट-(२२) पदेनोच्यन्ते । अयोग्यैः सह सम्भाषण-पूर्वकाज्जपाज्जप्यमाना मन्त्रा रुग्णा इव कार्याक्षमतया रुग्ण-(२३) पदेनाभिलप्यन्ते । अन्य-मन्त्रैः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

उपेक्षानास्थया जापाद् वैषम्यादवमानिताः ।
पञ्चविंशतिरुद्दिष्टा दोषास्तान्क्षमयेद् गुरुः ॥८१॥

एक-मन्त्रस्य जपे प्रारब्धे यद्यपरस्यापि मन्त्रस्य जपोऽसावधान-तयाऽनुष्ठीयते तदा द्वावपि तौ मन्त्रावाविल-(२४) नामानौ भवतः। आविलाः कलुषा अनर्थकरा इति यावत् ॥८०॥

उपेक्षा चानास्था च वैषम्यञ्चेति प्रकार-त्रय-मध्ये अन्यतमेन केनापि प्रकारेण जप्ता मन्त्रा अवमानित-(२५) पदेनाभिधीयन्ते। इष्टानिष्ट-प्राप्तेः स्व-स्व-प्रारब्ध-कर्माधीनत्वेनोपासनायां कृताया-मकृतायामपि तुल्यमिति बुद्धिरुपेक्षा। स्वकीय-दोष-स्वीयो-पासनयोर्मध्ये किं बलवत् किं निर्बलमिति विवेकाभावेनोपा-सनायामनाग्रह-बुद्धिरनास्था। वैषम्यात् स्वोपास्ययोर्मन्त्रयो-र्मध्य एकतरस्य होम-तर्पण-ब्राह्मण-भोजनादिषु न्यूनाधिक्या-श्रयणात्। इदन्तु मनोरमा-निधिकृतोर्मतमवलम्ब्योक्तम्। उच्छृङ्खलास्तु, अङ्ग-मन्त्रे गोपन-रूपाङ्गेन संवृतत्वं येषां मन्त्राणां नास्ति ते अङ्ग-हीन-संज्ञ-दोषवन्तो मन्त्रा इत्यर्थे स्वासंवृतेत्येव संज्ञा-पदं किं न स्यात्? न स्यात्, "दग्ध" इत्यादिना प्रायशः संज्ञा-पदस्यैवेतः पूर्वमभिधानात्। नास्थया आस्थां विना जपा-दुपेक्षा-नामक-दोषवन्तो मन्त्राः, वैषम्यादवमानिता मन्त्रा इत्येव मूल-स्वारस्य-सिद्धोऽर्थः, तेनोभयत्र लक्ष्य-लक्षण-पदानामभेदे-नोपादान-कृतौ न दोषः, नापि वैषम्यादित्यत्र चकारानुपादाना-प्रसक्तिः, न वा दोषेषु पञ्चविंशति-संख्या-व्याघात इत्याहुः। उपसंहरति पञ्चविंशतीत्यादिना। उद्दिष्टाः तत्तत्-पदोद्देश्य-भूतेषु

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

बन्धनं योनि-मुद्राया मन्त्राणां वीर्य-योजनम् ।
उभयं बोधयञ्छिष्यं संरक्षेद्गुरुरात्मवान् ॥८२॥

त्रयोविंशति-संख्य-बोधेषु प्रकारतया तादृश-बोध-द्वये विशेष्यतया विषयभूता इत्यर्थः, तेन दोष-द्वयस्यैवोक्ततया दुष्ट-मन्त्राणां त्रयोविंशति-संख्यतया दोष-परत्वे दुष्ट-परत्वे वा कथं पञ्च-विंशतीति संगच्छते तेति प्रत्युक्तम्, तादृश-बोध-विषयेषु पञ्चविंशति-संख्याया अव्याहतत्वात् ॥८१॥

उक्तदोषानपहरेत् इत्यत्रापहार-पदार्थ-जिज्ञासायाम् आह बन्धनमित्यादि । योनि-मुद्रायाः मूलाधारमारभ्य ब्रह्मरन्ध्रान्तं प्राण-मनसोर्गमनागमन-रूपायाः बन्धनमनुसन्धानमित्यर्थः । इति मनोरमाकारः । योनिर्नाम पायु-ध्वज-मध्य-स्थान-स्थित-सुषुम्णा-नाडी-दण्ड-मूल-गत-चतुर्दल-पद्म-कर्णिकाभिगत-त्रिकोणाग्नि-रूप-त्रि-जगत्-कारण-भूता कुण्डलिनी । योनि-पदाभिधेयत्वेऽपि त्रिकोण-रूप-भगाकृतिमत्त्वं कारणत्वञ्च निमित्तम् । मुद्रा नाम ब्रह्म-रन्ध्र-सहस्र-दल-कमलाधोवर्तिनी कुण्डलिन्याः स्व-सङ्गमात् परमानन्द-प्रदा चिन्मया परदेवता, मुदां प्रदानादेव मुद्रा-नाम-कत्वम् । बन्धनं नाम सुषुम्णा-नाडी-दण्डस्थ-हृदयाख्यत्र-स्थान-गता-नाहत-चक्र-स्थायि ऊर्द्धाधः-प्रसृत-किरणोढविस्र-(?) पर्यन्तोऽधः-प्रसृत-किरणकः पूर्वोपदर्शित-स्थानको बहिः स्वपर्यन्ताधः-प्रसृत-किरणकः पूर्व-दर्शित-स्थानकः शुद्धश्च । सर्वेषाममीषां तेजसां मिश्रणस्य संसारोत्पादकत्व-रूप-बोधकत्वात् तत्तेजस्त्रयं बन्धन-पदेनाभिहितम् । एतत्-त्रितयस्यैवमुक्तरीत्याऽनुसन्धानमेव योनि-मुद्रा-बन्धन-पदेनेह विवक्षितम् । नचैवं मुद्राया इति षष्ठ्यर्थोऽ-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

गुरोर्लक्षणमेतावदादिमान्त्यन्तु वेदयेत् ।
आदिमान्त्य-विहीनास्तु वर्णाः स्युः शरदभ्रवत् ॥८३॥

नन्वितः स्यात्, स्याच्च प्रथमैवेति वाच्यम् एतद्रहस्यार्थस्य गोपनाय तथा करणात्, षष्ठ्यर्थानन्वयमवेत्य प्रोक्तार्थ-करणे व्याकरण-मर्यादा-वेत्तॄणां प्रवृत्त्यसंभवेन गुप्तत्वस्य तादृगार्थे स्थैर्य-सम्भवात् इति निधिकारः । अपरे तु, अतिरहस्यार्थस्य व्याकुलाक्षर-सन्दर्भेणाभिधानं भगवता कृतं, न तु क्वापि शाब्दिक-मर्यादा परित्यक्ता, तस्मान्मुद्रे ति प्रथमान्तमेव । योनि-सहिता मुद्रा योनि-मुद्रे ति मध्यम-पद-लोपी समासः । येति प्रथमान्तं भिन्नं पदम्, षष्ठ्यन्तत्व-भ्रमेण पूर्वोक्त-रहस्यार्थे प्रवृत्त्यसम्भवेन गोप्यत्व-रक्षणार्थं येति कथितमिति वदन्ति । मन्त्राणां वीर्य-योजन-मिति वह्नि-सूर्य-सोमात्मकानां तेजसां शिवा-ज्येष्ठा-वामा-ज्ञानेच्छा-क्रिया-नामक-शक्तीनां ब्रह्म-विष्णु-रुद्र-रूपाणां मूर्तीनां ज्ञातृ-ज्ञान-ज्ञेयात्मक-प्रपञ्चस्य तत्त्वै विध्यकर-सत्त्व-रजस्तमोरूप-गुणानाञ्च यत् कारणं परं ब्रह्म तत्-स्वरूपत्वमेव वीर्य-पदेन सम्यक्-पदेन जीव-पदेन चाभिधीयते । एतस्य मन्त्रेषु स्थिरता-पूर्वकमनुसन्धानमेव वीर्य-योजनमित्यर्थः । एतदुभयं योनि-मुद्रा-बन्धनमित्येकं वीर्य-योजनमित्यपरमितुभयं शिष्यं प्रति बोधयन् अनुभवारूढता-मानयन् गुरुः शिष्यं पूर्वोक्त-दोष-दुष्ट-मन्त्र-प्रयोज्यानर्थतः संरक्षेत् । इत्थं बोधनमात्म-ज्ञानवत एव कृति-साध्यं नापरस्येत्य-भिप्रेत्याह आत्मेत्यादि ॥८२॥

गुरोः कृत्यान्तरमप्यादर्शयति गुरोरित्यादिना । आदिमेन सहितमन्त्यं वेदयेत् शिष्यं बोधयेत् । तथाचाऽऽदिमान्तर-बोध-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

तस्मादादित एवासौ ब्रूयात् तत्तदहङ्कृतिम् ।
यदहङ्कार-विज्ञानान्मत्-समो जायते नरः ॥८४॥
अनादि-क्रम-संसिद्ध-मातृकाद्यन्त-योजनात् ।
तादात्म्य-सिद्धिं तां विद्धि
सर्व-मन्त्रार्थ-विग्रहाम् ॥८५॥

कत्वमेव गुरोरसाधारण-धर्म-रूपं लक्षणमिति पर्यवसन्नम्। एतद्बोधस्यावश्यकत्वमेवाह आदिमान्तेत्यादिना। आदिमान्तयाद् विहीना आदिमान्तयाक्षर-मिलन-प्रतीतार्थ-विरहिणः। शरदभ्रं हि यथा मेघान्तरेण संबद्धं बहुशो गर्जनकरमपि वृष्टि-रूप-फलं जनयितुं न प्रभवति, तथा वर्णान्तरेण संबद्धोऽपि वर्णात्मको मन्त्रः सम्यग् उपासितोऽपि न साधक-समीहितं साधयितुमीष्टे ॥८३॥

यस्माद् एतद्बोधनम् आवश्यकं तस्माद् आदित एव दीक्षा-समनन्तरम् इतर-पूजादि-प्रकार-शिक्षणात् पूर्वमेव तत्तदहंकृतिं ब्रूयात् तत्तन्मन्त्र-गताहं-भावं वेदयेत्। तद्बोधस्य फलमाह यदहमित्यादिना। नरः उपासना-प्रकारेण साधकतामनागतोऽपि। साधकस्य तु मत्-समता-लाभे कः सन्देह इति भावः ॥८४॥

को वाऽहं-भाव-पदार्थ इत्याकाङ्क्षायामाह—अनादीत्यादिना। अनादेः संसारस्य क्रमस्तत्-कर्तृकोच्चारणं तेन संसिद्धा अपह्नोतुमशक्या या अकारादि-हकारान्ता मातृका तस्या आद्यन्तयोर्वर्णयोर्योजनाद् अहं-शब्दो निष्पद्यते, मकारस्याधिकस्य प्रवेशेऽपि

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

द्विजातीनां तु संस्कारं वेदोक्तं समुदाहृतम् ।
तेषां च तत्र तत्रापि विद्यया विधिमाचरेत् ॥८६॥

चाद्यन्त-योजन-सिद्धत्वस्याहं-शब्देऽनपायात् । यद्यपि क्षकार एव मातृकास्वन्त्यः, उपान्त्य-परत्वेनान्त्य-पद-वर्णनेऽपि न निर्वाहः, तत्त्वस्यापि विमल एव सत्त्वात्, तथापि विमलस्य य-वर्गीय-लकारेणैव, क्षकारस्य संयुक्ताक्षरतया संयोग-घटक-सृष्टि-श्वेताभ्यामेव च गतार्थत्वेन क्वचिद् विशेष-वचनात् पार्थक्येऽपि न सर्वत्र मातृकासु तावन्तर्भवत इत्यभिप्राय । अहं-पदाभ्यां तद्वर्ण-द्वय-तन्मध्य-गत-सर्व-वर्ण-तद्विग्रह-सर्व-मन्त्र-सर्व-नामधेय-तद्वाच्य-सर्व-प्रपञ्च-रूपत्वं मातृकायाः, स्वस्याप्यहं-पदार्थतया अहं-पदार्थ-जगत्तादात्म्यं सिद्धम् । इत्थञ्च आत्माभिन्नत्वेनोपास्यमाना मन्त्राः फलदायिनो भवन्तीति फलितार्थः । सर्वे मन्त्राः सर्वे अर्थाश्च विग्रहा विशेष्यतया विषय-भूता यस्याः । तादात्म्यञ्च प्रकारतया विषयीभूतम् । सिद्धिर्ज्ञानं सकल-मन्त्र-तदर्थ-भूत-देवता-विशेष्यक-स्व-तादात्म्य-प्रकारकं ज्ञानमिति यावत् । योजनादिति पञ्चम्यर्थस्य प्रयोज्यत्वस्य सिद्धि-पदार्थे प्रोक्त-रूप-ज्ञान एवान्वयः । तथा च "बन्धनं योनि-मुद्राया" इत्यारभ्य एतावत्-पर्यन्तं प्रकारं गुरुतो ज्ञात्वा शिष्यस्ताद्दश-प्रकार-पूर्वक-मन्त्रोपासनया दुष्ट-मन्त्र-प्रयोज्यान् दोषान् नावलम्बेतेत्यभिप्रायः । जननादि-संस्कारवदेतेऽपि प्रकारा गुरु-कर्तृका एवेति तु न भ्रमितव्यं "बोधयन्" "वेदयेत्" इति मूलास्वारस्य-प्रसङ्गात् ॥८५॥

ननु द्विजानां वेदैरेव दीक्षादि-संस्कारस्य कथिततया तद्विषयस्तान्त्रिकोऽयं दीक्षणादि-विधिर्न भवितुमर्हतीत्याशङ्कां

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

स-विद्या-स्मरणं कुर्यात् क्रियां सर्वत्र चोदिताम् ।
तेन तन्मयता-सिद्धिः सर्वत्र भवति ध्रुवम् ॥८७॥
अन्येषामपि वर्णानां विद्यया समुपाचरेत् ।
निधने विद्यया दाहो विद्ययाऽन्यत् समाचरेत् ॥८८

वैदिक-तान्त्रिक-दीक्षयोः समुच्चय-पक्षमङ्गीकृत्य समाधत्ते द्विजातीत्यादिना । द्विजातयः ब्राह्मण-क्षत्रिय-वैश्याः । समुदाहृतं दीक्षणादि-रूपं वेदोक्तं वेद-विहितं संस्कारमाचरेत् न त्वनेन तान्त्रिक-संस्कारेण तस्य बाधनं स्वीकुर्यात् । किन्तु तेषां द्विजातीनां तत्र तत्र प्रातःकृत्य-सन्ध्या-पूजा-होमादिषु विद्ययापि तत्तदुक्त-विधिमाचरेत् न तु त्यजेत् । तथा च सिद्धः समुच्चयः । एतेन निधिकृतां संस्कार-पदस्य प्रथमान्तत्व-भ्रमेण "नपुंसकत्व-निर्देशो दिव्यत्वादि"त्युक्तिः प्रत्युक्ता, द्वितीयान्तत्वे नोपवर्णन-सम्भवात् ॥८६॥

तदेव विशदयति—स-विद्येत्यादिना । एतेनाशौच-स्नानादि-विधेर्यस्तात्र तन्त्रे विशेषतो नाम्नानं तस्य विद्या-सहित-वैदिक-विधिनाऽनुष्ठानमत्रैव विहितत्वेन न तन्त्रान्तरापेक्षेति ध्वनितम् । यत्र कर्मसु मन्त्रो विशेषतो नोपदिष्टस्तत्र सर्वत्र विद्यया कर्म कुर्यात् न तूष्णीम् । एतेन स्नानाचमन-प्राणायामार्घ-स्थापनादिकं विद्यया कुर्यात् इत्युक्तम् । चोदितां प्रकृत-तन्त्रे कथितां न त्वघमर्षणाञ्जलि-दानादिकमपि तन्त्रान्तरोपदिष्टम् अत्र विद्यया अनुष्ठातव्यम् इति भावः । तन्मयता-सिद्धिर्विद्या तादात्म्य-प्राप्तिः । सर्वत्र वेदोक्त-संस्कार-शालिन्यपि ॥८७॥

ये पुनर्वेदोक्त-संस्कारानधिकारिणस्ते विद्योक्तमेव विधि-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

संपूज्य भोजयेदेकमनेकं वा स्व-शक्तितः ।
योगिनं विद्यया सिद्धं पूर्वतश्च निमन्त्रितम् ॥८९॥
उर्मिका-वसनाद्यैस्तं पूजयित्वा प्रणम्य च ।
विद्यया विसृजेन्मन्त्री स्व-विद्या-सिद्धये शिवे ॥९०॥
गुरोस्तु जन्म-दिवसं विद्या-प्राप्ति-दिनं तथा ।
स्व-जन्म-दिवसं नाथ-व्याप्ति-वासरमेव च ॥९१॥

माचरेयुरित्याह, अन्येषामित्यादिना । वर्णानां द्विजाति-भिन्नानां शूद्राणाम् इति यावत् । अन्येषामानुलोम्येन वर्ण-सङ्करजानां मूर्धावसिक्तादीनां, तेषां विद्याधिकारस्य "वर्णे स-सङ्करे" इत्यादिना द्वितीय-पटले [२।२७] भगवतैव सूचनीयत्वात् । गुरोरौर्ध्व-देहिके कर्मणि विशेषमाह—निधने इत्यादिना । अन्यत् अस्थि-सञ्चयन-पिण्डदानादिकम्, सं सम्यग् वेदोक्त-संस्कार-सहितं तद्-रहितञ्च यथायोग्यं पूर्ववदाचरेत् ॥८८॥

गुरोराब्दिकादि-श्राद्ध-दिने शिष्य-कृत्यम् आह—संपूज्येत्यादिना ॥८९॥

उर्मिका अङ्गुलीयकम् । आद्य-पदेन गन्धाक्षत-मालादि । एतत्-कर्मणः फल-दर्शनेन आवश्यकत्वं द्योतयति—स्व-विद्येत्यादिना । कल्याण-दायिकया त्वया अमित्वे (?) विद्याकृतमखिल-मपि कर्म सिद्धिं कल्याण-रूपां करोतीति समुचिततममिति ध्वनयितुं शिवे इति संबुद्धिः ॥९०॥

शिष्य-कर्तृक-पूजाया नित्यमसम्भवे पर्व-विशेषे ताम् उपदेष्टुं

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

अक्षर-त्रय-सम्पात-दिनं पूर्णा-दिनं तथा ।
षट् पर्वाणि विशिष्टानि स-दर्शं सप्त-पर्वकम् ॥८२॥

पर्वाण्याह—गुरोरित्यादिना । विद्यायाः प्रस्तुत-प्रधान-विद्यायाः, यद्दिने दीक्षा जाता तद्दिनं द्वितीयं पर्व । स्व-गुरोर्नाथस्य व्याप्तिः नाथत्वेन प्राप्तिः, यद्दिने तदपि दिनं मरण-दिन-रूपं चतुर्थं पर्व ॥८१॥

अक्षर-त्रय-संपात-दिनं वक्ष्यमाण-घटिका-चक्रे एकाक्षरस्य स्थान-त्रये यस्मिन् दिने संपातो दर्शनं तद्दिनम् । यद्वा, घटी-चक्रे त्रिकोण-त्रये अक्षर-त्रयस्य सम्यग् एक-रूपतया पातो यस्मिन् इति विग्रहः । फलं तु तुल्यम् । दिन-पदोपादानात् तादृश-घटी-सम्बन्धात् सूक्ष्मतर-सूर्य-संक्रान्ति-संबन्धादिव संपूर्णस्यैव दिनस्य पर्व-कालत्वमुक्तं तेन घटिका-रूप-सूक्ष्म-काले प्रतिष्ठा-विधेर्विधातु-मशक्यत्वेऽपि न क्षतिः । न च चरमाक्षर-द्वयं पर्याय-नित्या-दिन-नित्ययोर्यदा घटिकाक्षरं भवति तत्-काले द्यति(?) दिनमेवा-क्षर-त्रय-सन्निपातः स्यादिति वाच्यम्, तत्तन्नित्ययोरनियताक्षर-मादायैव तथात्वस्य साम्प्रदायिकत्वात् ।

केचित्तु, एकस्यैवाक्षरस्य दिनाक्षरत्व-युगाक्षरत्व-घटिकाक्षरत्व-रूपेण सन्निपातो यत्र दिने तद्दिनं तादृशं पर्व । दिनाक्षरं युगार्ण-रूपम्, यदुक्तं जामले—

षट्त्रिंशद्भिर्दिनैर्मन्त्रैर्युगः प्रोक्तो वरानने ।
कृते अहर्गणे प्रातर्लब्धे भागे वराङ्गने ।
षट्त्रिंशद्भिर्महेशानि दिनं निश्चित्य भामिनि ।
षट्त्रिंशद्वर्ण-मध्यस्थं क्रमेण गजगामिनि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

मासतो वर्षतो वापि कुर्यादेतेषु पूजनम् ।
गुरोस्तु जीविते नित्य-व्याप्ते तत्-पुत्रकादिकम् ॥८३

य एव दिनजो वर्णः स एव युगजो भवेत् ।
उदयार्णः स एव स्यात् तदा भवति भामिनि ।
अक्षर-त्रय-संपातः पर्वात्मा परमेश्वरि ॥

तद्दिनाक्षरं, तद्दिन-नित्यायाः प्रथमाक्षरं तद्दिनोदयाक्षरैस्तद्दिना-हर्गण-संख्यायां षट्त्रिंशता हृतायां (निष ?) संख्या-विशेषाक्षरञ्च यद्येकमेव स्यात् तदा अक्षर-त्रय-संपात-नामकं पर्व-स्यादिति वदन्ति । काल-नित्यायाः प्रथमाक्षरं, केवल-तत्त्वात्मकं द्वितीयाक्षरं घटिकाक्षरं चेति त्रीण्यक्षराणि यद्दिने एकतामापन्नानि तत् तथेति केचित् । विशेषानुक्तौ प्रकरणोपस्थित-मूल-विद्याक्षर-त्रयमेव, संख्याया विभिन्न-धर्मिगामितया विभिन्न-रूपं यत् किञ्चिदत्र प्रतीयते, तथा च वर्षाक्षर-मासाक्षर-दिनाक्षरादि-रूपाणां येषां केषाञ्चिद् विद्या-सम्बन्धिनां यद्दिने सन्निपातस्तदेवाक्षर-त्रय-संपात-दिनमिति मूल-स्वारस्यायातमर्थमाकुलयामः । पूर्णा-दिनं पञ्चमी-दशमी-पूर्णिमान्यतम-दिनम् । स-दर्शमिति पूर्णा-दिन-मित्यनेनान्वितम् । सप्त-पर्वकं सप्त पर्वाणि एवमुक्तानीति शेषः । सप्त-पर्वस्वपि पूर्व-षट्कं विशिष्टमवश्यानुल्लङ्घ्यम्, सप्तमस्य सामर्थ्य-विधुरस्योल्लङ्घनेऽपि न तथा प्रत्यवाय इत्यभिप्रायो (विशेषामन्त्यादेः ?) पृथङ्निर्देशस्य ॥८२॥

एतेषु कर्तव्य-कर्म-विशेष-दर्शनेन पर्व-कथन-फलं दर्शयति—मासतवित्यादिना । पूजनं प्रस्तुत-प्रधान-देवताया एव नैतेषु पर्वस्वावश्यकं किन्तु गुरोरपीति प्रोक्त-पर्व-विशेष-पुरस्कारेण

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

पूजयेत्तत्-समं तं च प्रणामाद्यैरुपाचरेत् ।
तदभावे तत्-कुलीनं तद्भक्तं वा समर्चयेत् ॥९४॥
स्तुवीत पञ्चभिः श्लोकैस्तं नित्यं सर्व-सिद्धये ।
प्रातः प्रबोध-समये जपात् सु-दिवसं भवेत् ॥९५॥
नमस्ते नाथ ! भगवञ्छिवाय शिव-रूपिणे ।
विद्यावतार-संसिद्धै स्वीकृतानेक-विग्रह ॥९६॥

पूर्वमुपदर्शितामपि गुरु-पूजां पुनर्दर्शयति गुरोस्त्वित्यादिना । व्याप्ते इत्युपलक्षणार्थकम् । पुस्तकादिकमिति द्वितीयान्तं "पूजयेत्" इत्यग्रिम-क्रिया पदे कर्मत्वेनान्वितम् । आदि-पदं पौत्र-प्रपौत्र-परम् ।

यत्तु, "पूर्व-सूचितामपि गुरु-पूजामावश्यकत्व-द्योतनाय पुनः स्मारयति गुरोस्त्वित्यादिने"ति निधिकृतोक्तम्, तत्तेदं वक्तव्यम्, एकवारं कथनेनाप्यावश्यकत्वस्यालाभे कतिवारं कथनात् तल्लाभ इति विनिगमकं निर्वाच्यमिति ॥९३॥

तत्-समं स्व-गुरु-समानम् । तद्भक्तं स्व-गुरु-भक्तम् ॥९४॥

तं गुरुम् । प्रातः-काल-जपस्य फलं सुदिनत्वं, संपूर्ण-दिन-व्याप्त-सुखकत्वं पठितुः स्यादित्यर्थः ॥९५॥

स्तुवीतेति सूचित-स्तव-स्वरूपाकाङ्क्षायां येन केनापि स्वोपस्थित-वाक्य-सन्दर्भेण तत्-प्राप्तौ नियममाह नमस्ते इत्यादि । भगवन् कर्तुमकर्तुमन्यथा कर्तुं समर्थ । शिवाय कल्याणात्मकाय, निरन्तरं तद्दान-तत्परत्वात् । विद्यानां ज्ञानानां मन्त्रत्व-व्याप्य-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

नवाय नव-रूपाय परमार्थैक-रूपिणे ।
सर्वाज्ञान-तमोभेद-भानवे चिद् घनाय ते ॥९७॥
स्वतन्त्राय दया-क्लृप्त-विग्रहाय शिवात्मने ।
पर-तन्त्राय भक्तानां भव्यानां भव्य-रूपिणे ॥९८॥

विद्यानां वा यो माहृग्रेषु दीन-विशेषे स्ववतार: संबन्धस्तस्य सम्यग् विधि-पूर्वकं फलीभूत-पुरुषार्थाधिगमन-पूर्वकं वा या सिद्धि-र्लब्धिस्तस्यै, यद्वा प्रस्तुत-विद्यायास्तत्-प्रकाशक-कादिमताख्य-प्रकृत-तन्त्रस्य योऽवतार: प्रचारस्तत्-सिद्धयर्थम्, स्वीकृता अनेके विग्रहा येनेति सर्वेष्वर्थेषु समानम् ॥९६॥

नवाय प्रतिदिनमभिनवाय, सर्वदा यौवनवते । नव-रूपाय प्रकाश-विमर्शादि-वक्ष्यमाण-नवनाथ-स्वरूपाय । परमार्थैक-रूपिणे इत्यनेन श्रीसत्यनाथत्वमुक्तं परमार्थ-रूपस्यैव ब्रह्मण: सत्यत्वात् । सर्वाणि यान्यज्ञानानि तान्येव यानि अध:पातकतया तमांसि तेषां भेदने नाशने भानु: सूर्य: तद्रूपाय, एतेन श्रीज्ञाननाथ-रूपत्व-मुक्तं, "सर्वं ज्ञान-प्लवेनैव वृजिनं सन्तरिष्यसि" इत्यादि-वचनात्, ज्ञानस्यैवाज्ञान-नाशकत्वात् । चिद्घनाय चिन्मयाय, एतेनानन्द-नाथ-तादात्म्यम् उक्तं, "नित्यं विज्ञानम् आनन्दं ब्रह्म"त्यादि-श्रुत्यापि ज्ञानात्मनयेव आनन्द-रूपत्वाभिधानात् ॥९७॥

स्वतन्त्राय पारतन्त्र्य-शून्याय । एवं-विधस्यापि भक्ति-पारतन्त्र्यं, यतो हि निरुपधि-पर-दु:ख-प्रहाणेच्छा-रूपया दयया क्लृप्तो विग्रह: शरीरं यस्येत्येवं-भूताय । पूर्व-विशेषण-द्वयेन(?) सुभग-नाथ-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

विवेकिनां विवेकाय विमर्शाय विमर्शिनाम् ।
प्रकाशानां प्रकाशाय ज्ञानिनां ज्ञान-रूपिणे ॥९९॥
पुरस्तात् पार्श्वयोः पृष्ठे नमस्कुर्यादुपर्यधः[1] ।
सदा मे चित्त-रूपेण विधेहि भवदासनम् ॥१००॥

तादात्म्यमुक्तम्, भगवत एव नाना-विचित्र-सामर्थ्य-दर्शनात्, उत्तरेण विशेषणेन स्वभाव-नाथ-स्वरूपत्वं सत्-स्वभावानामेव दयावत्त्वात् । शिवो भगवानेव, एतेन श्रीपूर्णनाथ-तादात्म्यमुक्तं, भगवत एव पूर्ण-रूपत्वात् । भव्यानां कल्याणानां, सकल-वस्तूनां मध्ये कल्याण-रूपत्व-कथनाद् वा श्रीपूर्णनाथ-तादात्म्यस्य आनन्दनाथ-तादात्म्यस्य वा ध्वननं कृतम् ॥९८॥

विवेकिनाम् इदन्ताहन्तयोर्यथार्थ-ज्ञानवतां विवेको यथार्थ-ज्ञान-रूपः, एतेन प्रतिभ-नाथ-तादात्म्यमुक्तं, प्रतिभावतामेव विवेको-दयात् । विमर्शः तत्त्वमसीत्यादि-वाक्यार्थापरोक्ष-ज्ञानं तद्वतां तादृश-रूपस्त्वमिति कथनाद् विमर्शानन्दनाथ-तादात्म्यं दर्शितम् । प्रकाशानां तेजस्विनां मध्ये प्रकाशस्तेजः, एतेन प्रकाश-नाथ-स्वरूपत्वमुक्तम् । ज्ञानिनां तत्त्व-ज्ञानवतां ज्ञान-रूपः तत्त्व-ज्ञान-स्वरूपः, एतेनापि श्रीज्ञाननाथ-तादात्म्यं दर्शयितुं सूचकम् ॥९९॥

एवं स्तुत्या समुत्पन्न-करुणो गुरुर्यदि वरं वृणीष्वेति ब्रूयात् तदापि त्वद्दास्य-भावादन्यत्र मे प्रार्थनीयमस्तीति प्रार्थयेत पुरस्तादित्यादिना । सकल-देशावच्छेदेन त्वामेवाहं नमस्कुर्यामिति प्रार्थनया सर्व-देशेषु त्वदीयमेव दर्शनं प्राप्नुयामित्यपि

---

1. V. r. Comm नमस्कुर्याम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

भूमि-तत्त्वमयी व्याप्तिरिति सम्यक् समीरिता ।
अस्या निस्फालनाच्चित्ते तत्तत्त्वं स्वात्मसात् क्रमम् ॥

इति षोडश-नित्या-तन्त्रे श्रीकादिमते प्रथमः पटलः॥

प्रार्थितं भवति । सर्व-कालावच्छेदेन मदीय एव चित्ते निवसेत्यनया प्रार्थनया सर्वदा त्वत्-स्मरणेनैव मम कालो गच्छत्विति प्रार्थितम् ॥१००॥

तत्त्वमसीति-वाक्यार्थ-विमर्शनस्यैव शास्त्रान्तरे मुक्ति जनकत्वाभिधानात् तत्-साम्य-विवक्षयैकैक-तत्त्व-स्वरूपत्वम् एकैक-पटलस्य क्रमेण विवक्षितम् । तत्तत्-पटलार्थस्य सम्यग् ज्ञानेन तत्तत् तत्त्वं स्वाधीनं भवति, एवं सर्व-तत्त्वेषु स्वाधीनेषु जातेषु मुक्तिः कर-तलामलकीभूतैव इत्यभिप्रेत्य प्रथम-पटल-समाप्ति-प्रदर्शनं तदिति फल-प्रदर्शनञ्च करोति भूमीत्यादिना[1] । * *

साक्षाच्छ्रीपति-कार्तवीर्य-करुणा-कल्पद्रुमोद्यत्-फले
विद्वत्-प्रेमनिधि-प्रसिद्ध-धिषणारामप्रिया-सम्भवे ।
अन्वर्थाभिध-तन्त्रराज-विषमालोकार्थ-सन्दर्शना-
न्वयख्यार्नी-सुदर्शनेऽत्र पटलः पूर्वोऽप्यपूर्वो गतः ॥

---

(1) It is mentioned here by the scribe himself "अत्र पत्र (छल ?)-चतुष्कं पतितम्" i.e., four folios (lines ?) of the original were missing.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

APPENDICES

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

VARIANT READINGS

The bold figures represent the numbers of the verses, the others their pādas.

1. 1. A अनायनो पराधीन। 2. E स्वाधीनः। 3. A विरत; पुरत। 4. E विश्व-कालो।

2. A.—पार्वत्युवाच, B—शङ्कर उवाच। 3. B-E त्वं पुराणां। 4. D तत्स्वयः।

3. 1. D सापेक्षा। 3. A तु। 4. B तेषां।

4. 2. A अन्यामपेक्षया; E अन्यान्यपेक्षया। 3. F सर्वमयत्वेन। 4. A तत्व।

5. 3. E काली तु; F-C शक्त्याख्यां। 4. B तत्तन्मतान्मया; F तत्तत्मते।

6. 2. E तन्त्र-नामतः।

7. 2. A शक्तिः सा।

8. 1. A तथा। 3. A अवसाने तु। 4. A व्रजेच्छमाम्।

9. 1. A मन्त्रावतारादि; E-F तन्त्रावतारादिः। 3. A विद्योद्धार। 4. A ततो ह्ये।

11. 2. A दशमे स्थिता।

12. 1. A शिवा दूती; E भवेद्दूती। 2. A त्वरिता सा।

13. 1. B ततोऽनिल। 3. C-F नित्यान्तो। 4. A संज्ञका; B-D संज्ञिता।

14. 1. A एकविंशतिके। 3. E लयोर्विंशे च।

15. 1. A मातृकाख्या; C मातृकोक्ता। 2. A मन्त्र-वैभवः। 1-2. E श्वास-रूपमष्टाविंशेऽच्छ-लोकता।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

16. 1. A कुन्द-क्षिप्ति। 2. B-D तद्रूर्ध्वं। 3. B त्रिंशत्। 4. A-C-E-F होमात् काम्य-फलोदयः।

17. 3. A मर्माणि; B-C-F नर्माणि; E कर्माणि। 4. A पञ्चविंशे सवासना।

18. 4. A तत्त्व-विग्रहः।

20. 2. E सुसुखता। 4. A सत्त्वता।

21. 2. A सन्तोष-परिपूर्णता; B सन्तोषः परिपूर्णता।

24. 1. A गुरु-भक्तश्च। 2. A मन्त्रे च दैवते।

25. 4. A कृतादरः।

27. 4. E मौनं प्रहसनं।

28. 2 A-C-E-F कार्याणि; D परिवेदनं। 3. A-E-F ऋणादानं तथा दानं।

30. 4. B भक्ति-समन्वितः।

32. 3. A नित्य-सेवां।

33. 2. A षड्योजनान्तरम्।

34. 2. A तदा। 3. A छाया-कललमन्यद्वा। 4. A यत् तत्-स्पृष्टं सुपूजयेत्; E यत्तत्पृष्टं सुपूजयेत्; F यत्तत्पृष्टं तु; C तत्स्पृष्टं।

35. 4. A स्थितं।

36. 1. A विधिम।

37. 2. A त्वन्येनापि; F त्वन्ये चापि। 3. A क्षत्यमेनं। 4. E तेन समाचरेत्।

38. 4. A न मन्त्रैर्दैव; E न मन्त्रैर्दैव-पूजनात्।

39. 2. A यथोदितम्।

40. 1. A षोडशानां।

41. 1. D अग्निन्यादिकत्रटचेषु। 2. A सर्गान्त। 3. A-C-D-F चत्वारि योजयेद् विद्वान्; E चत्वारि योजयेदाद्यं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

42. 2. A-B श्चाद्युचरेखा। 3. A-D यत्तु षष्ठं।

43. 1. A वर्णौ; E मन्त्रादि-वर्णेन; F मन्त्राद्य-वर्णेन।

44. 4. A चोदिताः।

46. 1. A प्रथमे प्रथमे; D प्रथमः प्रथमे। 2. A द्वितीये; D द्वितीयं।

47. 1. A-F तृतीयमनग्रतः। 3. D तत्र कोष्ठेषु।

48. 1. A-E वर्गेषु।

49. 1. A सिद्धादीन्; E सिद्धादीनानयेद्द्। 4. D सिद्ध-साधकः।

50. 1. B सिद्धेषु; A सुसिद्ध-सम्प्राप्ता; E सिद्धेषु सिद्धिः सम्प्राप्ता। 2. B सिद्धारेर्हन्ति गोत्रजम्। 3. E साध्य-सिद्धोऽति। 4. A सिद्ध-साध्योऽति।

51. 1. D सुसाध्य-साध्यः। 2. B जाप्याद्यैः।

52. 2. E-F स्यादितोऽन्यथा। 3. A-E सुसिद्धस्तु। 4. A क्षतं क्रमम्; B क्षतः क्रमः।

53. 1. E-F तस्मात्तत्। 2. A योजयेन्मनुम्। 3. A रिपोर्दैवि।

54. 1. A-E सुसिद्धारिः। 2. A स्वकुलं। 4. B साध्यस्तु योषितम्।

55. 1. A-E अरिः; F अरिसुसिद्ध-मन्त्रस्तु। 4. E सम्प्राप्तां वं।

56. 3. C-F भिन्नात्; E भिद्यात्।

57. 4. A-E-F पूर्वम्मणी।

58. 3. A कृताभ्यासः; D कृताभ्यासात्।

59. 1-2. E-F फलावाप्ति-काले। 3. F सम्प्राप्ति-मन्त्रे वा। 4. A प्राक्कृतः।

60. 2. A सिद्धिभाग् भवेत्; B सिद्धि-भाजनः। 4. E.-F मन्त्र-भोगं; A-D अवाप्नुयात्।

61. 1. A-D-E स मन्त्रस्य। 2. A-E पूर्वकम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

62. 1. B-C-D-F पद्माख्यैः। 2. E-F पुत्रंजीवैः।

63. 1. A-D वाद्यमाला। 2. A पूर्वां पूर्वां ; B-E-F फले।

64. 2. A मातृकान्तरितं ; E-F मातृकां त्वरितं।

66. 1. E-F पूर्वं-विहिते। 2. A कर्मणी हृतम्।

7. 3. E नैमित्तिकादि। 4. A तथा।

68. 2. A-E-F शुडाम्बरधरः।

69. 4. E-F प्रेचा-कारिगत।

72. 1. E पल्लवं। 2. D-E-F सम्पुटं। 4. F द्वान्तरीकृतेः।

74. 1. A परिहारांश्च ; E-F तान् परिहारांश्च। 4. C-F योगस्तु।

75. 2. C तच्च स्यात्। 3. A-B स्वविधिः ; E-F स्वं विधिः प्राप्तः। 4. A-B रिपु-कोष्ठगाः।

76. 1. A लघ्वचराः प्रायो। 3. A कव्य-बाहुल्यात्। 4. E-F अलसाः।

77. 1. B भिन्नाः स्युः। 4. A-C-E-F मूर्छिताः।

78. 1. D मन्त्र-पत्रेषु।

79. 1. A खण्डीकृताः ; E-F खण्डीभूतास्तसंजापात्।
4. B. गरवीर्यास्तु ; E-F चीण-वीर्यास्तु।

81. 1. A उपेक्षानास्थया। 4. A तांश्कमयेत्।

82. 2. A नित्य-योजनम्। 3. A अभयं ; E. बोधयेत्। 4. E. स रक्षेत्।

84. 1. B एवाथ। 2. B-E-F ब्रूयात्तत्तदहङ्कृतिम्।

86. 1. A तेषां चरित्रं।

87. 1. B न विद्या।

88. 1. B सर्वेषामपि।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

89. 2. E अनेकान् ।

90. 2. D रचयित्वा ।

92. 4. B-C-D सन्दर्शं ।

93. 3. A-E-F जीवतो नित्यं ; 3. D गुरोस्तु जीवतो दूरे ।
4. E पूर्वकादिकम् ; F. पुस्तकादिकम् ।

93-94. In A, verse no 94 is given as 93 and 93 as 94.

94. 1. A तत्-समानञ्च ।

95. 4. D व्रजेत् ।

96. 2-3. A भगवंश्छिवाय गुरु-रूपिणे । 3. C-E-F गुरु-रूपिणे । 4, C-E-F विग्रहः ।

100. 3. A-E मच्चित्त ।

101. 3. A निष्फालनादिति । 4. A स्वात्मना कृतम् ।

Notes

P. 3, l. 14. नाम्ननाधिकारस्य—नाम्ननाधिकारः स्वस्य (?) ।

P. 9, l. 22. वृत्तजार्णान्, etc. is based upon 35. 56, p. 704, ङ्के र्णान् खे त्त द जा लि वृ तः क्र यो त्य ग स्त म र्व्यं ।

P. 10, l. 8 पुस्तक-दान—पुस्तकादान ?

P. 10, l. 12, "श्लोकेन" ; see TantraRT., 35. 57.

P. 11, l. 2, "नाभक्ताय", etc. ; see op. cit., 36. 98.

P. 11, l. 10 "नाम्नम्नायाचरेण च" ; see op. cit., 1. 42.

P. 11, l. 17, "नित्यातिक्रम", etc. ; see op. cit., 1. 67.

P. 11, l. 19, परकृतापेक्षाया—परकृतानपेक्षाया ?

P. 13, v. 7. The names of the nine नाथs who were

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

evidently teachers of the तारा cult are given in the तारा तन्त्र as the following :—प्रह्लादानन्द, सनकानन्द, कुमारानन्द, वशिष्ठानन्द, क्रोधानन्द, सुखानन्द, ज्ञानानन्द, बोधानन्द and कारणानन्द ; see Tārā T., ll. 25-26.

P. 13, l. 9. क-कार—स-कार ?

P. 16, l. 1. एकविंशतमे। Read एकविंशतिमे।

Pp. 17-19, vv. 19—22. The following marks of the Guru are given in the TantraS., p. 1,

"शान्तो दान्तः कुलीनश्च विनीतः शुद्ध-वेशवान्।
शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान्॥
आश्रमी ध्यान-निष्ठश्च तन्त्र-मन्त्र-विशारदः।
निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते॥"

See also KāmākhyaT., paṭala 4, शान्तो दान्तः कुलीनश्च शुद्धान्तःकरणः सदा, etc. ; KulārT. paṭala 13, vv. 40-50, p. 195 f. (the first three qualifications are just the same as given in the TantraR.) ; Viśva T., paṭala 2 ; PrapS. 35. 22 f. ; BrahmaVP., श्रीकृष्ण—जन्म—खण्ड, chap. 59. The principal qualifications mentioned in the GautaT. are almost the same as mentioned in the TantraRT.

V. 19 of TantraRT. is just the same as the GautaT., p. 48, v. 5.

For various Tantras quoted with reference to the marks of the Gurus, see Hara-tattva-dīdhiti, fourth ed., p. 61.

For the four types of Gurus, viz., Guru, Parama-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

guru, Parāpara-guru and Parameṣṭi-guru, see TārāT., paṭala 4, vv. 2 ff., p. 13. The most important of them all is the Dīkṣā-guru or Parama-guru ; see also BṛhanNT., paṭala 2, "आदौ सर्वत्र देवेशि मन्त्रदः परमो गुरुः", etc. ; Mahiṣa-mardinī-tantra as quoted in the S'akT. The KulārT. mentions six types of Gurus, 13. 128, p. 206.

गुरु = गॄ + कु उच्च (कृग्रोरुच्च—UṇādiS. 1. 25). The derivative meaning may be suggested as either of the following :—गिरत्यज्ञानं गॄणात्युपदिशति धर्मं or गीयते स्तूयते देवादिभिः यः सः ।

In the Tantrārṇava, as quoted in the TantraS., p. 4, vv. 46-48, the meaning of Guru is given as follows :—

"ग-कारः सिद्धिदः प्रोक्तो रेफः पापस्य दाहकः ।
उकारः शम्भुरित्युक्तस्त्रितयात्मा गुरुः परः ॥
ग-काराज् ज्ञान-सम्पत्ती रेफः पापस्य दाहकः ।
उ-काराच्छिव-तादात्म्यं दद्यादिति गुरुः स्मृतः ॥
गु-शब्दस्त्वन्धकारः स्याद् रुशब्दस्तन्निरोधकः ।
अन्धकार-निरोधित्वाद् गुरुरित्यभिधीयते ॥"

For almost identical verses, see KulārT., 17. 8-10, pp. 254-255.

P. 19, v. 22 (b). An identical line is found in the GautaT., p. 49. v. 15 (b).

For persons who should not be chosen as Gurus, see TantraS., p. 2, vv. 21-25.

P. 21, ll. 19-20. "गजाश्वा महिषो" etc. ; see TantraRT., 2. 50.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

Pp. 21-22, vv. 23-24. The KulārT., pp. 193-195, deals exhaustively with the qualifications as well as disqualifications of the disciple which the Guru must take into consideration before initiating and imparting the mantras to him. See also PrapS., p. 238f.

For the qualifications of a disciple, see TantraS., p. 3, vv. 26-27 ; GautaT., p. 49, v. 16f. ; cp. DīkṣāT.,

"वाङ्-मनः-काय-वसुभिर्गुरु-शुश्रूषणे रतः ।
एतादृश-गुणोपेतः शिष्यो भवति नारद", etc.

For a person who should not be initiated and be rejected as a disciple, see TantraS, p. 3, vv. 28-33.

The TantraS. p. 3, vv. 28-33, enjoins that the Guru should not impart the mantra to a person without having personal contact with him for one year ; according to the KulārT., 14-19, the period may be reduced to 6 months or even 3 months. According to the BrahmaVP., Śrī-kṛṣṇajanma-khaṇḍa, chap. 61, once a person is accepted as a disciple by the Guru, he should be treated as a son,

"यथा पुत्रस्तथा शिष्यो न भेदः पुत्र-शिष्ययोः ।
तर्पणे पिण्ड-दाने च पालने परिपोषणे ॥
यथाऽग्निदाता पुत्रश्च तथा शिष्यश्च निश्चितम् ।
इतीदं काण्व-शाखायामुवाच कमलोद्भवः ॥"

A slight distinction between the two is, however, to be made, says the VāmanaP. (chap. 57),

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

"विशेषः शिष्य-पुत्राभ्यां विद्यते धर्म-नन्दन।
धर्म-कर्म-समायोगे तथापि गदतः शृणु॥
पुन्नाम्नो नरकात्त्राति पुत्रत्वेनेह गीयते।
शेष-पाप-हरः शिष्य इतीयं वैदिकी श्रुतिः॥"

The कुल-चूडामणि-तन्त्र, 7. 57, enjoins that the identity of the Guru must not be disclosed.

P. 22, ll. 17-18. cp. the Sāra-saṃgraha as quoted in the TantraS., v. 37, p. 3—

"राज्ञि चामात्यजो दोषः पत्नी-पापं स्व-भर्तरि।
तथा शिष्यार्जितं पापं गुरुः प्राप्नोति निश्चितम्॥"

P. 23, v. 25f. For the duties of the disciple towards the Guru, see HaraTD., p. 63, l. 10f.; see also p. 373f.

P. 23, ll. 8-9. "युगे युगे", etc. = Parāśara-smṛti, 1. 33, p. 32.

P. 23, l, 17. यद्वा is stead of सदा?

P 24, v. 28 (b)—29 (a). cp. Rudra-yāmala,

"ऋण-दानं तथादानं वस्तूनां क्रय-विक्रयम्।
न कुर्याद् गुरुणा सार्धं शिष्यो भूत्वा कदाचन";

also quoted in the TantraS., p. 4, v. 45.

P. 25, v. 30. cp. Prapañca-sāra, 6. 122, p. 47,

"मन्त्रे मन्त्र-गुरावपि मन्त्री मन्त्रस्य देवतायाञ्च।
त्रिषु विहित-सतत-भक्तिः प्रेत्येह निजेप्सितं फलं लभते";

GautaT., v. 27 (b)—28 (a), p. 170,

"यथा मन्त्रे तथा देवे यथा देवे तथा गुरौ।
पश्येदभेदतो मन्त्री एवं भक्ति-क्रमो मुने;"

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

also KulārT., paṭala 13, v. 64, p. 199,

"यथा घटश्च कलसः कुम्भश्चैकार्थ-वाचकः ।
तथा देवश्च मन्त्रश्च गुरुश्चैकार्थ-वाचकः ॥" etc.

According to the Kālī-vilāsa tantra (9. 1 f., p. 21 and 4. 15f., p. 10), whole-hearted devotion is essential for the attainment of Siddhi. For meditation upon the Guru, see Pādukā-pañcaka, v. 6 & the comm. upon the same, pp. 104-106. See also HaraTD., p. 64, l. 10f.

P. 26, vv. 32-33. The Nityānanda, as quoted in the TantraS., vv. 56-59, p. 5, says that the disciple should bow down to the Guru three times a day, if they live in the same village; if the Guru lives within a distance of two miles, he should do so once a day and so on.

P. 26, ll. 7-8. "गुरु" etc. = TantraRT., 2. 82.

P. 27, v. 34. cp. TantraS., p. 4, vv. 43-44, गुरु-शय्यासनं यानं, etc.

P. 28, v. 38. The TantraS., p. 5, v. 55, quotes an almost identical verse from the Nityānanda,

"गुरुं न मर्त्यं बुध्येत यदि बुध्येत तस्य तु ।
न कदाचिद्भवेत् सिद्धिर्मन्त्रैर्वा देव-पूजनैः" ;

cp. Yoginī-tantra, p. 2, column 2; KulārT., 13, 52ff., p. 177f., "अत एव शिवः साक्षाद्गुरु-रूपं समाश्रितः" etc.; कालीचरण's षट्चक्र-निरूपण श्लोकार्थ-परिष्कारिणी, p. 65, l. 22, "...स्व-गुरुं शिव-रूपिणम्...स्मरेत्..."।

P. 28, v. 39. cp. काली-विलास-तन्त्र, p. 2, v. 13f.; also KālīT., paṭala 8, v. 26, p, 42,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

"गुरोरनुज्ञामात्रेण दुष्ट-मन्त्रोऽपि सिध्यति।
गुरुं विलङ्घ्य शास्त्रेऽस्मिन्नाधिकारः सुरैरपि॥"

The company of an unfit Guru should, however, be shunned, says the KulārT., 13. 132, p. 207, "मधु-लुब्धो यथा भृङ्गः", etc.

P. 29, v. 40. cp. Kālī T., 1. 7, p. 6, where it is stated that with regard to the Mahā-vidyā or Mahā-mantra of Kālikā Devī, the a-ka-tha-ha and kulākula cakras need not be taken into consideration. The TantraS., p. 10, quotes the Muṇḍa-mālā and other Tantras to show that in connection with the worship of the Mahā-vidyās, viz., Kālī, Tārā, Mahā-vidyā, Ṣodaśī, Bhuvaneśvarī, Bhairavī, Chinnamastā, Vidyā, Dhumāvatī, etc., various considerations may be dispensed with.

P, 30, l, 12. चत्वारो—च चत्वारो ?

P. 31, l. 14. मन्त्रयोः—नाम-मन्त्रयोः ?

P. 31, l. 17. प्रभवान्—प्रथमान् ?

Pp. 32-33, verses 42-43 (a) have been quoted in the TantraS., p. 12, v. 12; v. r. तेन मन्त्राद्य-वर्णेन नामाद्याद्यक्षरेण च···यदि षष्ठं···रिपु-मन्त्राद्य-वर्णं···।

P. 38, l. 1. 16. *Read* 18.

P. 40, v. 45. For the Siddhādi-cakra, see Mantra-mahodadhi, taraṅga 24, p. 114f.

P. 40, ll. 9-10. एवं धनर्णा-शुद्धिस्तु, etc. = Tantra RT., 1. 61 (b).

P. 40, l. 17.. संगृह्णीय। *Read* संगृह्णीतस्य।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

P. 43, vv. 48ff. cp. KulārT., 15. 80 ff. TantraS., vv. 34-37, p. 15.

P. 46, v. 54. cp. Mantra-mahodadhi, taraṅga 24, p. 115, v. 16,...सुसिद्धारिः कुटुम्बहा। अरि-सिद्धः सुतं हन्यादरि-साध्यस्तु कन्यकाम्। तत्-सुसिद्धस्तु पत्नीघ्नः, etc.

Pp. 47—49, vv. 56-57. These two verses are almost identical with two verses found in the KulārT., 15. 93-94. V. 56 is also identical with a verse quoted in the TantraS., p. 19, l. 5, from a work the name of which is not mentioned. For another form of ṛṇi-dhanī cakra, see RudraY, chap. 5, p. 14, कोष्ठान्येकादशान्येव वेदेन पूरितानि च। अ-कारादि-ह-कारान्तं, etc. For the process advocated by the MantraM., see p. 116, v. 40,... अष्टाभिर्विभजेत् पुनः, etc.

P. 47, l. 18. For the ascertainment of Nāma-rāśi and Mantra-rāśi, see MantraM., p. 115-116, taraṅga, 24, vv. 43-48.

P. 48, l. 5f. cp. RudraY, paṭala 5, p. 14, l. 2f.

P. 48, l. 11. Read after स्मृतः,—शिष्टः पूर्ववद्गनितार्णताः।

P. 48, l. 12. see MantraM., taraṅga 24, vv. 43-46, p. 116, v.r.,……गणयेन्मातृकाद्यर्ण-क्रमेण…नाम-राशिरुदीरितः…… विभजेत् सप्तभिः।

P. 49, v. 57. cp. MantraM., taraṅga 24, v. 42, p. 116,

"अधमर्णोऽधिको राशिरूनो राशिर्धनी स्मृतः।
मन्त्रो यदाऽधमर्णः स्यात्तदा ग्राह्यो धनी न तु॥"

See also op, cit., v. 49 ; TantraS. p. 18, v. 51. मन्त्रश्च-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

द्धो भवति तदा मन्त्रः शुभदो भवति धनी चेन्न ; also other Tantras quoted in TantraS.

P. 50, v. 58. cp. MantraM., op. cit., vv. 50-51, p. 116.

"यो मन्त्रः पूर्व-जनुषि सेवितो नाददात् फलम् ।
पापात् पाप-क्षये जाते फलावाप्तिरनेहसि ॥
आयु (?) क्षयाद् गतो नाप्तं साधकोऽस्य भवान्तरे ।
ऋणित्वात् प्राप्ति-मात्रेण मन्त्रोऽभीष्टं प्रयच्छति ॥"

P. 50, l. 22. साधक—साधन ?

P. 53, vv. 62-63. cp. Prapañca-sāra, 20. 40, p. 143. According to the Uḍḍīs'a-tantra 2, 1—9, pp. 29-30, different objects are obtainable by counting the beads made of different materials ; e.g., by counting beads made of Putrajīva, one acquires knowledge. See also Gautamīya-tantra, p. 177, vv. 38-39 ; TantraS., p. 29, v. 69.

P. 53, v. 63 (b). For details regarding the garland of letters, see TantraS., pp. 28-29 ; see also GautaT., p. 70, पञ्चाशल्लिपिर्माला, etc. ; also S'yāmāR., p. 70, "माला पञ्चाशिका प्रोक्ता," etc. ; KulārT., 15. 48, p. 227. For the meaning of akṣa-mālā, see KulārT., 17. 58, p. 261.

P. 53, ll. 7-8. "नराणामिव" etc.=TantraRT. 35. 80.

P. 53, l. 13. "सुप्तो जागर्ति" etc. See Rudra-yāmala, as quoted in the TantraS., v. 63, p. 19 ; the complete verse is :

"सुप्तो जागर्ति येनासौ दूरस्थः प्रतिभाषते ।
वदत्यन्य-मनस्कोऽपि तन्नाम ग्राह्यमेव च ॥"

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

P. 54, v. 64. cp. KulārT., 15. 49, p. 228; also Viśuddheśvara-mahā-tantra as quoted in the ŚyāmāR., p. 147, "अनुलोम-विलोमेन...लङ्घयेन्न कदाचन"; Yoginī-tantra, p. 4, "अनुलोम-विलोमेन", etc.

P. 55, v. 65. cp. Bṛhac-Chrī-krama as quoted in the Śyāmā-rahasya, p. 148, "तर्जन्यग्रे तथा मध्ये यो जपेत् स तु पाप-कृत्", etc.; also Muṇḍa-mālā as quoted in the same, "तर्जन्यग्रे तथा मध्ये यो जपेत्तु भ्रमान्नरः", etc.

KulārT., 17. 34, p. 258, gives the following interpretation of Japa—

"जन्मान्तर-सहस्रेषु कृत पाप-प्रणाशनात् ।
पर-देव-प्रकाशाच्च जप इत्यभिधीयते ॥"

Pp. 55-56, vv. 68—71. cp. KulārT., 15. 11f., p. 236.

P. 56, v. 72. For the definition of the technical words mentioned in this verse, See MantraM.. p. 119, taraṅga 25, column 2, v. 17 f. "...विन्यासः प्रोच्यतेऽधुना ॥
ग्रन्थनञ्च विदर्भाख्यः संपुटो रोधनन्तथा ।
योगः पल्लव एते षड् विन्यासाः कर्मसु स्मृताः ॥"

P. 57, l. 6. निधिकृतो । *Read* निधिकृतोक्तं ।

P. 61, l. 14 "असम्यकत्व" etc. = TantraRT., 35.70.

P. 62, v. 81. For the defects of the Mantras, see KulārT., 15. 65—70, pp. 230-231; also Hara-tattva-dīdhiti.

P. 63, v. 82. cp. KulārT., 13. 92, p. 202, बन्धनं योनि-मुद्राया मन्त्र-चैतन्य-दर्शनम्," etc. For the significance

